Shri Raghunath Temple MSS. Library,
JAMMU

No. ५९२-घ

Title यतिराजसप्ततिः सटीका

Author वेङ्कटनाथार्यः

Extent २६ Age

Subject वेदान्त

यतिराजसप्ततिः

५५१

५८७ — ५८५ और ५६२

छायावादिनिरसनं —

यतिधानंपत्यतीपत्रास्तताङस २०॥

६०।६

नं० ५९९ घ.

२४ पत्राणि

यति. टी. १

ॐ श्रीमते रामानुजाय नमः श्रीमन्निह्वेंकटगुरवे नमः सकलयतियतिकुलधुर्यः सनिगमान्ताचार्यदेशिकप्रवरः तेष्वस
त्कुरुवर्य्योहरिदासश्रीनिवासगुरुमुख्योः १ एतैरजसम्मतिश्रुतिव्याख्यायाससद्बुधाज्ञया शक्त्यास्तयमेव विंदन्तस्सा विबुधाः
सार्थान्यटीकाभ्यः २ इह खलु भगवान् वेंकटनाथार्यः श्रीमद्रामानुजमुनिस्तुतिं चिकीर्षुरादौ गुरुपरंपरामनुसंधत्ते कमप्या
द्यमित्यादिना कमपीति कमलयालक्ष्म्यागृहमेधिनं पत्नीविशिष्टं कमलाभिधानपत्नीसहितमित्यर्थः कमपि अनिर्वाच्यम
हिमानमाद्यगुरुं प्रथमाचार्यं वंदे प्रणमामि यो भगवान् छंदसां वेदानां प्रवक्ता अध्यापकः यो ब्रह्माणं विदधाति पूर्वं यो वै वेदां

ॐ श्रीमते रामानुजाय नमः श्रीमन्निह्वेंकटगुरवे नमः ॥ श्रीमान्वेंकटनाथार्यः कवितार्किककेसरी
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि १ कमप्याद्यगुरुं वंदे कमलागृहमेधिनं प्रवक्ता छंदसां
वक्ता पंचरात्रस्य यः स्वयं १

श्च प्रहिणोति तस्मा इति श्रुतेः यो गुरुः पंचरात्रस्य पंचरात्राख्यभगवच्छास्त्रस्य स्वयं व्यासादिप्रवेशं विना साक्षादेव वक्ता उपदे
ष्टा पंचरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमिति स्मारितं एतेन पंचरात्रस्य साक्षाद्भगवन्मुखोदितत्वाद्वेदतुल्यप्रमाणत्वम
चितं प्रवक्तेत्यादिना प्रथमाचार्यत्वस्यापि तं गृहैर्दारैर्मेधन्ते संगच्छन्त इति गृहमेधिशब्दे उपपदे मेधृ संगम इति धातोर्णिनि
प्रत्ययः गेहेकर्दतिस्त्रेण गेहेकर्तरिग्रहेः कः स्यादिति विहितकप्रत्ययान्तगेहवाचिग्रहशब्दस्य तासस्या लक्षणया पत्न्या
कनिरित्याहुः ॥ १ ॥ राम ॥ ॥ राम १

सहधर्मचरीमिति संमन्त्रितं सम्यगालोचितं जगतां हितं यया तां जगद्धितालोचनपरामित्यर्थः अनुग्रहमयीं अनुग्रहप्रचुरां नित्यं
सदोषज्ञानतः अविदितः निग्रहो दण्डो यया तां कदाचिदपि स्वजनेषु निग्रहमकुर्वतीमित्यर्थः शौरेर्भगवतः सहधर्मचरीं आश्रित
रक्षणादिव्यापारेषु सहधर्मचारिणीं लक्ष्मीं वन्दे अज्ञातनिग्रहामिति भगवदपेक्षयोत्कर्षो व्यज्जितः भगवतो निग्रहसमानाधि
करणानुग्रहत्वादज्ञातनिग्रहत्वे लक्ष्मीनामस्तु दैत्यादिमर्दिनीतिनामतत्स्वरूपदुर्गादिरूपेणासुरहननादिभिरित्याहुः चरतीति
चरी पचादिषु चरडिति पाठाद् टित्वान्ङीप् धर्मस्य चरी धर्मचरी सह धर्मं चरतीति सुप्सुपेति समासः २ वन्दइति सूत्रव
त्याः सखा यस्मात्तं सूत्रवतीसखं राजाहःसखिभ्यष्टजिति टच्यकारान्तशब्दः सूत्रवतीपतिमित्यर्थः वैकुण्ठस्य भगवतः से

सहधर्मचरीं शौरेः संमन्त्रितजगद्धितां अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहां २ वन्दे वैकुण्ठसेनान्यं देवं सू
त्रवतीसखं यद्वेत्रशिखरस्पन्दे विश्वमेतद्व्यवस्थितं ३ यस्य सारस्वतं स्रोतो वकुलामोदवासितं श्रुती
नां विश्रमायालं शठारिं तमुपास्महे ४ ॥ नान्यं सेनानायकं देवं विष्वक्सेनाख्यं नित्यसूरिं वन्दे यस्य विष्वक्सेनस्य वेत्रयष्टि
स्तस्य शिखरे अग्रे तस्य स्पन्दे चलने एतद्विश्वं जगत् व्यवस्थितं यथामर्यादानतिक्रमो न स्यात्तथा स्थितमित्यर्थः वेत्राग्रचलनमात्रेण वि
श्वं नियमितं वर्तत इति भावः सेनां नयतीति विग्रहे सत्सूद्विषेत्यादिना क्विप् सेनानीशब्दः तस्य द्वितीयैकवचनान्तं सेनान्यमिति ३
यस्येति वकुलानां वकुलपुष्पाणां आमोदेन सुरभिगन्धेन वासितं परिमिलितं यस्य शठारेः सारस्वतं सरस्वतीसंबन्धि स्रोतः प्रवाहः
श्रुतीनां वेदानां विश्रमाय श्रमनिवृत्त्यर्थं कृष्टं परिकल्पितं दुरर्थतापनिवृत्त्यर्थमित्यर्थः अलं समर्थं तं शठारिं उपास्महे ध्या
येम इत्यन्वयः वेदार्थप्रतिपादकशठारिश्रीसूक्तेः वेदस्य भगवत्पर्यवसायितात्पर्यज्ञापनेन तद्विहितहृतात्पर्यकस्य नाज्ञेनितं

प्रति. टी. २

त्वेदं निराकृत्य वेदस्योल्लासं कृतवति यथा कुमार्गगमनश्रान्तं उहर्षं सुरभिकुसुमवासितं शीतलोदकं स्वमं नितरां स्वानंदयति तद्व-
दिति भावः वकुलकुसुमानां स्थिरपरिलतानां हृद्वेदवशठारिहृत्कपोदि स्थिरस्सा इति तद्वनाय भक्ताः शठारिं वकुलकुसुमैरर्चयाः-
मासुरिति संप्रदायः माधुर्यादिना तन्मूलेन च श्रीसूक्तीनां तद्वासनासंबंधेपि संबंधोक्तिरूपरूपातिशयोक्तिभेदेन स्तोतः शठारिः लक्ष-
णामूलं प्रयोगेन माधुर्यादिनाश्रीसूक्तीनामनवरतानुभवेप्यानंदावहत्वं वस्तुव्यज्यते नमः स्वसूक्तीत्यादिना अलंशब्दयोगाद्धि
अमायेतिचतुर्थी ४ ॥ ॥ नाथेनेति मुनीनां नाथेन प्रभुणा नाथेन श्रीमन्नाथमुनिना अहं नाथवान् प्रभुमान्भवेयं श्री-
मन्नाथमुनिरेव मम प्रभुरिति भावः यस्य नाथमुनेः नैगमिकं वेदविदितं तत्वं तत्वविदितं इति ठक् हस्तामलकतां करामलक-

नाथेन मुनिना तेन भवेयं नाथवानहं । यस्य नैगमिकं तत्वं हस्तामलकतां गतो ५
नमस्याम्यरविंदाक्षं नाथभावे व्यवस्थितं शुद्धसत्वमयं शौरेरवतारमिवापरं ६

तां गतं प्राप्तं यस्य सर्वोपि वेदार्थः करतलामलकवत्स्फुटप्रतिपन्न इति भावः ५ नमस्यामीति नाथे नाथमुनिविषये भावो भा-
वना तत्र व्यवस्थितं नियतं भगवत्पक्षे नाथभावो नाथत्वं सर्वस्वामित्वं तेन व्यवस्थितं इत्यरव्याद्वत्त शुद्धसत्वमयं शुद्धसत्वं रज-
स्तमःसंकीर्णत्वेपि सत्वप्राबल्येन तत्कार्यं यत्प्रकृत्यसत्वात्संजायते ज्ञानमिति श्रुतः स्वकार्यप्रदत्वं तादृशसत्वप्रचुरं भगवत्पक्षेप्र-
प्राकृतसत्वरूपमित्यर्थः अतएव शौरेर्भगवतः अपरमवतारमिव स्थितं अरविंदाक्षं श्रीपुंडरीकाक्षाख्यगुरुं नमस्यामि नम- राम
स्करोमि नमो वरिवस्याचित्रङः क्यजिति नमःशब्दात्पूजार्थे क्यचि लट् उत्तमपुरुषैकवचनं नाथभावव्यवस्थिततादिश्लेषमू-
लकाभेदाध्यवसायनिबंधनातिशयोक्तिसमर्थितधर्मसाधारण्येन निमित्तेन भगवदवतारत्वोत्प्रेक्षालंकारः ६ ॥ ॥ २

अनुज्झितेति अनुज्झितः अपरित्यक्तः क्षमायाः क्षान्तेर्योगो संबन्धो येन तं क्षमागुणशालिनमित्यर्थः अनेन विशेषणेन श्रीरामस्य परशुरामव्यावृत्तिः कृता परशुरामस्तूज्झितक्षमायोगः अयं त्वनुज्झितक्षमायोग इति भावः तत्पक्षे उज्झितस्त्यक्तः क्ष्मायाः भूमेः क्षमागुणस्य वा असहनं मुनित्वात् योगो येन स तथोक्तः पुण्यजनानां पुण्यकृज्जनानां बाधको न भवतीत्यपुण्यजनबाधकस्तं अनेन विशेषणेन रघुरामव्यावृत्तिः कृता रघुरामस्तु पुण्यजनानां राक्षसानां बाधकः यातुधानः पुण्यजनो नैरृत इत्यमरः श्लेषभङ्ग्या सज्जनबाधक इति प्रतीयते अयं तु तथा न भवति अस्पृष्टो अनाश्रितो मदो गर्वो रागो विषयाभिलाषश्च येन तं अनेन विशेषणेन बलरामव्यावृत्तिः कृता स तु स्पृष्टसंबन्धः मदेन हालास्वादोत्थविकारेण घोरो रागो रक्तिमा यस्य स तथोक्तः स्पृष्टमदराग एव न त्वस्पृष्टमदराग इति भावः

अनुज्झितक्षमायोगमपुण्यजनबाधकं अस्पृष्टमदरागं तं रामं तुर्यमुपास्महे ७

विगाहे यामुनं तीर्थं साधुवृन्दावने स्थितं निरस्तजिह्मगस्पर्शे यत्र कृष्णः कृतादरः ८

अत एव तुर्यं न हि लक्षणेन चतुर्थं तं यामुनविनेतृत्वेन प्रसिद्धं राममुपास्महे ध्यायामः श्लेषोत्थापितव्यतिरेकसंकीर्णो भगवदवताररामसमूहमध्यगणनासंबन्धेपि संबन्धोक्तेरतिशयोक्तिभेदः सोपि रामशब्दश्लेषानुप्राणित इति संकरः ७ विगाह इति साधूनां सत्पुरुषाणां वृन्दस्य समूहस्य अवने रक्षणे स्थितम् अन्यत्र साधुरमणीयं वृन्दावनं वृन्दावनाख्यवनविशेषस्तत्र स्थितं यामुनं यामुनाचार्यं यमुनासंबन्धि तीर्थं च गुरुं जलावतारमार्गं च निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ जलावतारयोनौ चेत्यमरः विशेषाद्विगाहे मनसा वपुषा च प्रविशामीति यथायोग्यान्वयः गाहू विलोडने इत्यस्माल्लट् उत्तमपुरुषैकवचनं निरस्तो निवारितः जिह्मगानां कुटिलवृत्तिपुरुषाणां जिह्मगस्य कालियाख्यसर्पस्य च स्पर्शः संबन्धो यस्मात्तस्मिन् तथोक्ते यत्र यामुनाचार्ये यमुनायां च

दमि
टी
२
3

नारेव कृष्णः श्रीकृष्णः भगवान् कृतः आदरो भयाभावश्च येन स तथोक्तः अभूदिति शेषः इतो द्वीशं त्वभीगोते स्थितिर्वैजयंती कृष्णः भगवा
न् यामुनाचार्यं आदरमकरोत् यमुनातीरे कालियनिवर्तनेन भयाभावमकरोदिति भावः प्रकृताप्रकृतश्लेषालंकारः अभिधाप्र
कृतार्थनियंत्रणात् प्रकृतार्थध्वनिर्वा ८ ॥ ॥ दयेति दयायां निघ्नं अधीनं अधीनो निघ्न आयत्तः इत्यमरः यतींद्रस्य देशिकं आचार्यं
पूर्णं ज्ञानभक्त्यादिभिः पूर्णं तथा पूर्णं इति प्रसिद्धनामधेयं आश्रये सं आश्रये विश्वसृजो जगत्स्रष्टुर्विष्णोर्मनोरथो येन पूर्णेन आ
पूर्यत इति पूरितः यं तत् कुशदासकृतकैंकर्यजनितप्रीतिर्भगवतो याह शी ताह शी प्रीतिर्निखिलजगन्निर्माणे ऽपि कदाचिद
पि नाभूदिति भावः ९ प्रणममिति लक्ष्मणमुनिः मामकं मदीयं प्रणामं प्रतिगृह्णातु अंगीकरोतु प्रार्थनायां लोट् यस्य त

दयानिघ्नं यतीद्रस्य देशिकं पूर्णमाश्रये येन विश्वसृजो विष्णोर पूर्यत मनोरथः ९
प्रणमं लक्ष्मणमुनिः प्रतिगृह्णातु मामकं प्रसादयति यत्सूक्तिः स्वाधीनपतिकां श्रुतिं १०

मानुजमुनेः सूक्तिः स्वाधीनः स्ववशः पतिः प्रभुः भगवान् शृंगारनायकश्च यस्यास्तां श्रुतिं प्रसादयति न्यायविशेषैः परिष्करो
ति कुदृष्टिपरिकल्पितान्यायैरन्यथाभावं प्रापितां क्लिष्टां श्रुतिं समीचीनन्यायैः सरलीकृत्वा रंजयतीति यावत् स्वगम्भूषणकुंकु
मकर्पूरचंदनानुलेपनादिभिः अलंकरोतीति चेत्यर्थः यथा स्वाधीनिकां कांचिन्नायिकां कतिचयैः खलैर्बलात्कारेण केशावकर्ष
णादिभिः स्वानुकूल्यवर्तिना पत्युः क्लेशितां बलवदवष्टब्धां सतीं कांचित् दागत्य तान्निराकृत्य आकर्षणादिजनितं वैरूप्यं परिहृत्य
सम्यगलंकरोति तेन हृदि तिनायिकासतीव्यवहारप्रतीतेः समासोक्तिरलंकारः अत्र भगवतश्च स्वाधीनत्वेनामस्मृसमैके वेद्य
स्वरूपपरगुणविग्रहविभूतिमत्वं १० ॥ रामायनमः ॥ ॥

राम
२

एवं गुरुपरंपरां प्रणम्य अनन्तरं श्रीमद्रामानुजमुनिं दिव्यमङ्गलविग्रहमनुध्यायति उपवीतिनमिति उपवीतिनं यज्ञोपवीतवन्तं ऊ-
र्ध्वपुण्ड्रवन्तं त्रयाणां जगतां पुण्यफलं अवयवो दण्डस्त्रिदण्डः स हस्ते यस्य तं यथोक्तं शरणागतानां सार्थं संघं वहतीति शरणागत-
सार्थवाहः वहेः कर्मण्यणन्तं सार्थान्तु जन्तुभिरित्यमरः शिखया शेखरिणं शिरोभूषणवन्तं यतीनां पतिं ईडे स्तुवे ११ रामा-
नुजमुनेर्भगवत्स्वचायुधावतारत्वमुत्प्रेक्षते प्रथयन्निति विमतेषु विरुद्धेषु तीक्ष्णभावं उग्रस्वभावं प्रथयन् प्रकटयन् यतीन्द्रः
लक्षणे शतृप्रत्ययः अस्मत्परिरक्षणे अस्माकं रक्षणे विशये प्रभुः समर्थः भवतीति शेषः मुरारेर्भगवतः पंचभिरायुधैः अप्र-

उपवीतिनमूर्ध्वपुण्ड्रवन्तं त्रिजगत्पुण्यफलं त्रिदण्डहस्तं शरणागतसार्थवाहमीडे शिखया शेखरिणं पतिं
यतीनां ११ प्रथयन् विमतेषु तीक्ष्णभावं प्रभुरस्मत्परिरक्षणे यतीन्द्रः अपृथक्प्रतिपन्नयन्मयत्वैर्ववृधे
पंचभिरायुधैर्मुरारेः १२ शमितोदयशंकरादिगर्वः स्वबलादुद्धृतयादवप्रकाशः अवरोपितवान्
श्रुतेरपार्थान्ननु रामावरजः स एव भूयः १३ ॥

थक्परस्परसंसर्गेण प्रतिपन्नं प्राप्तं यन्मयत्वं तत्पदार्थरामानुजमुनिरूपत्वं यैस्तैस्तथोक्तैः सद्भिर्ववृधे वर्धितवान् वृधु वृद्धौ इत्यस्माद्धातोर्भावे
लिट् भगवतस्य चायुधान्यपि विमतेषु असुरेषु तीक्ष्णभावं निशितत्वं भजन्ति अस्मान् रक्षन्ति च अतो धर्मसाधारण्याद्भगव-
त्स्वचायुधान्येव मिलितानि रामानुजरूपत्वेनावतीर्णानीत्युत्प्रेक्षा व्यंजकाप्रयोगाद्गम्या १२ रूपस्यावतारत्वमुत्प्रेक्षते शमितेति उ-
दयः उदयनाचार्यः न्यायशास्त्रप्रणेता शंकरः शंकराचार्यः आदिशब्देन भट्टाचार्यादयो गृह्यन्ते तेषां गर्वः शमितः शान्तिं प्रा-
पितो येन स तथोक्तः तन्मतखण्डनेन तेषां गर्वहानिरिति भावः स्वबलात् स्वशक्त्या उद्धृतः उन्मूलितः स्वमतं त्याजितः इति यावत्

यादवप्रकाशः यादवप्रकाशाख्यमायिमतकर्ता येन स तथोक्तः श्रुतेरितिनिजास्यैकवचने श्रुतिस्पृहत्वर्थः अर्थान्तरापविरुद्धार्थान्
परिकल्पितानिति विशेषः अवतोपितवान् परिहृतवान् एषः रामानुजमुनिः सः द्वापरे अवतीर्णो रामावरजः ननु कृष्ण एव भूयः निश्रुप
प्रज्ञावधारणानुज्ञातानुनयामन्त्रणेनन्विस्यमरः श्रीकृष्णोपि शमितउदयः उत्पत्तिर्यस्य गर्वस्य स शमितोदयः शंकरादेः हृद्रादेः ग
र्वो यस्य स तथोक्तः बाणासुरयुद्धे कृष्णस्य शंकरगर्वभंजकत्वात् स्ववलादिति कपटेप्रपंचमीत्वप्राप्तिभूतवलरामस्य कृष्णस्यापि तेन स
हत्वं वः उद्धृतः निर्वाहितः पादवानां प्रकाशः कीर्तिर्येन स तथोक्तः अपार्थान्यार्थविरुद्धान् दुर्योधनादीनवरोपितवान् हिंसितवान्
अतो स्य कृष्णावतारतं युज्यत इति भावः अवरूढांकुरवीजजन्मनिशान्तुभावे चयस्मात् ह्वौ तौ लिंचिकृतः योन्यतरस्यामिति कारे

अवकृष्टानन्तभवश्रुतीनां जरतीनाम यथायथप्रचारं विनि
वर्तयितुं यतीश्वरोक्तिर्विदधे ताः स्थिरनीतिपञ्जरस्थाः १४

स्यग्रकारादेशः ततः क्वतुप्रत्ययः १३ ॥ ॥ यतीश्वरश्रीसूक्तिरन्यापविशेषैः श्रुतिं स्वार्थे नियमयतीत्याह अवकृष्टेति कृष्टं श्र
वणं वकृष्टं येषां ते अवकृष्टाः ते न भवन्तीत्यवकृष्टाः अनन्ताः तेभ्यः सम्भव उत्पत्तिर्जरतीनां वृद्धानां अनादीनामित्यर्थः श्रुती
नाम् यथायथप्रचारं स्वस्वार्थं परित्यज्य अर्थान्तरपरतां प्रचरणं विनिवर्तयितुं विशेषेण निवर्तयितुं यतीश्वरोक्तिः ताः श्रुतीः स्थिरताः कृतवती
अवकृष्टानीनयप एव पंजरास्तत्र तिष्ठन्तीति पंजरस्थाः विदधे चकार नसत्रचासंक्रिवएवकेवलः इत्यादि श्रुतीनां परोक्तशिवकार
णत्वनिवर्तनाय शिवादिशब्दानामन्यत्र वृत्तिं संहित्वाद को हवै नारायण आसीदिति वाक्योक्तनारायणपर्यवसानं नारायणशब्द
स्यान्यत्र वृत्त्यसंहितत्वात् शिवे पर्यवसानमित्यादिन्यायैः श्रीमद्रामानुजार्यश्रीसूक्तिः शिव एव केवल इत्यादिश्रुतीः स्वार्थेनार
यणएवावस्थापयतीति भावः वृद्धाः स्त्रावन्मार्गप्रदर्शकानुरोधेन गच्छन्ति न हि तत् श्रुतयोपि कुदृष्टिवुद्ध्यनुसारेण यान्तरबोधकाः इतिद्यो

पतिः टी ४

राम ४

सर्वेषामाचार्याणामलंकारभूतो रामानुजमुनिरित्याह अमुनेति नयनेन नयमानिशायी अतिशायिनो भूमा यस्य सतेन नायकमणि
पक्षे नयनेन स्वर्घमतिशेतेन यनानिशायी भूमा यस्य स तन योऽन्येन हृयाधिकतेजसेत्यर्थः अमुना सकलजगद्रक्षणार्थमवतीर्णेनेन न
तुः दत्तात्रेयादिवद्देहमात्रसंरक्षणार्थमवतीर्णेनेति भावः यतिराजेन बद्धा संबद्धा नायकश्रीः नेतृशोभैव मध्यरत्नशोभा यस्यास्सा
तथोक्ता महती गुरुपंक्तिः पराङ्कुशपरकालनाथयामुनादिगुरुपंक्तिरेव हारयष्टि हारावलिः विबुधानां विदुषां हृदयंगमा मनोहारं
जनी सेव हृदयंगमा वक्षस्थले धारणीया सती विभाति श्लिष्टाश्लिष्टरूपालंकारः १५ रामानुजमुनिसिद्धान्तनिष्ठा भूमेर्मुक्ता
हारवदलंकारभूतेत्याह अलूनेति अलूनपक्षस्याबाधितसहायस्य अच्छिन्नगरुतश्च पक्षः पार्श्वगरुत्साध्यसहायबलेष्वङ्क्ते

अमुना नयनातिशायभूम्ना यतिराजेन निबद्धनायकश्रीः महती गुरुपंक्तिहारयष्टिर्विबुधानां हृदयंगमा
विभाति १५ अलूनपक्षस्य यतिक्षमाभृतो विभाति वंशे हरितत्समवायं यदुद्भवाः शुद्धसुवृत्तशीतला
भवन्ति मुक्तावलिभूषणं भुवः १६ ॥

षितिनिघंटुः यतिक्षमाभृतः यतिराजस्यैव क्षमाभृतः पर्वतस्य वंशे विद्यासंततावेव वेणौ वंशोऽनुकुलमस्करादिष्वमरः ।
अक्षयं नाशरहितं हरितत्वं नदेव हरिद्वर्णः विभाति विशेषेण प्रकाशते शुद्धाः रागद्वेषादिरहिताः मुक्ताश्च शुद्धाः समीची
नाचारवन्तः सम्यग्वर्तुलाश्च शीतलादिगुणैः प्रसन्नाः शैत्ययुक्ताश्च यद्यपि परस्परविशेषणविशेष्यभावविवक्षया वि
शेषणसमासः यदुद्भवाः यस्मिन्वंशे उत्पन्नाः भवन्ते: यत्नाद्य भुवः भूमेः मुक्तावलिभूषणं मुक्ताग्रहणपंक्तिरेव मौक्तिकाहा

पनि·
टी·
५

रत्नरूपाभरणं भवंति मुक्तानुल्यत्वं तया मुक्तत्वव्यपदेशः वंशेषु मौक्तिकानि जायंत इति प्रसिद्धं अत्र वंशे अन्वये हरितनतं हरित
गोत्रमिति न भ्रमः कार्यः [illegible]न्वयस्य बाधितत्वात् हरितगोत्रमित्यनेन तस्यार्थस्याभावात् श्लिष्टरूपालंकारः १६ ॥ ॥
अनपायेति अस्मिन् श्लोके प्रसिद्धं चंद्राद्वैलक्षण्यमुच्यते अनपायः अपायरहितः विष्णुपदसंश्रयो भगवत्पदारविंदसंश्रय,
णं यस्य स तं न वासुदेवभक्तानामशुभं विद्यते क्वचिदित्युक्तेरनपायत्वं चंद्रस्तु निर्यक्षयिष्णुत्वात्सापायः विष्णुपदसंश्रयः तत्पक्षे ॥
विष्णुपदमाकाशं वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी इत्यमरः कयापि कलया कयापि विद्यया कलमात्रयाप्यनुज्झितं २

अनपायिविष्णुपदसंश्रयं भजे कलया कयापि कलयाप्यनुज्झितं अ
कलंकयोगमजडाशयोदयं यतिराजचंद्रमुपरागहृद्गतं १७ ॥

अपरित्यक्तो चंद्रस्तु एककलां विना इतरकलाभिः परित्यक्तः तत्पक्षे कला षोडशो भागः कला तु षोडशो भाग इत्यमरः अकलंकया
गदोषरहितेन सत्तु कलंकयोगः तत्पक्षे कलंकश्चिह्नं कलंकोंकापवादयोरित्यमरः न विद्यते जडस्याशयस्याभिप्रायस्योदयः आ
विर्भावो यस्य स तं अभिप्रायश्छंद आशय इत्यमरः चंद्रस्य जराशयोदयः मंदस्य लघुपौरस्य जलाशयात्समुद्रादुदय आविर्भावो
यस्य स तथोक्तः उपरागात् उपरागात् व्यवच्छिन्नगते दोषवतो हृतगते राहोरपि तु मशक्यमित्यर्थः चंद्रस्तु परागस्य राहुग्रहस्य राम
हरणे न भवति उपरागो ग्रह इत्यमरः एवंविधं यतिराजचंद्रं भजे सेवे इत्यन्वयः श्लेषमूलकाभेदाध्यवसायनिबंधनातिशयो ५

श्रीमद्रामानुजमुनिचरणयुगलमाश्रितानां सत्त्वविदुषां परस्परविशेषणतत्काष्ठाभवतीत्याह अधिगम्येति अनघादोषरहिताः शो
भमाना मेधा बुद्धिर्येषां ते सुमेधसः नित्यमसिच् प्रजामेधयोरिति समासान्तो सिच्प्रत्ययः यतिचक्रवर्तिनो यतिराजस्य पदपद्मे एव
यद्युगम् अभिलषितार्थलाभात्यद्युगं तत्स्वरूपं सम्यगधिगम्य प्राप्य हरिभक्तदास्ये भगवत्कैङ्कर्ये रसिकाः प्रीतिमन्तः परस्परं क्रयवि
क्रययोरर्हया योग्यया यादृश्या स्थित्या समिंधते सम्यक् प्रकाशन्ते इंधि दीप्तौ इति धातोस्स्मात्लट् यथा लोके केचित्स्वर्णेन वा वस्तु निरसि
काः माहराज यद्युगमाश्रित्य परस्परं क्रयविक्रयव्यवहारं कुर्वन्ति तद्वद्भगवता श्रीरामानुजमुनिपदसंश्रयणात्परस्परं क्रयविक्रययो
ग्यदशामापाद्यन्त इति भावः स्वकीयमेव वस्तु विक्रयार्हं परेषां क्रयणार्हं च चौरदृष्टं तथनस्वविक्रयेपि परेषां क्रयणार्हत्वात् अ

अधिगम्य सम्यगनघाः सुमेधसो यतिचक्रवर्तिपदपद्मयुग्मम् हरिभक्तदास्यरसिकाः परस्परं क्रयविक्रयार्हद
वादपरि शया समिंधते १८ परुषाणि वादपैशुनप्रमुखानि प्रभूतपतनीयपङ्किला स्वदते ममाद्य सुभगा सरस्वतीय
तिराजकीर्तनकृतैर्विशोधिता १९ ॥ नोभागवतानां भागवतेषु सत्त्वदृढीकरणाय क्रयपदं समासोक्तिरलङ्कारः तस्य
पदपद्मयुगमिति निरूपकं मूलमिति तत्पाशंकरः १८ स्ववाचः परनिन्दादिदोषदुष्टत्वेपि यतिराजकीर्तनसंबंधात्सत्कीर्तनकान्ता
रपरिवर्तनपांसुलावाचं शोधिकेत्यालापगङ्गयैव तु नीमहत्स्तुतिरीत्या परिशुद्धतया अत्यन्तमास्वादनीयत्वेनेत्याह परुषेति अति
कठ्वत्वास्पष्टत्वेऽपि तीवादाः यथालापाः परिवादः परनिन्दा पैशुनं पिशुनत्वं प्रमुखानि आदिर्येषां तानि तैः प्रभूतैः प्रचुरैः पतनीयैरि(
तिपतनीयैर्दोषैः पांसुभिः पङ्किलास्तु टावज्जलमिति वाङ्कलकः करणे अनिप्रत्ययः पङ्किलात्तु इष्टा अविलाच ममसरस्व
तीवाणी नदीति गम्यते अद्य यतिराजस्य कीर्तिभिः कीर्तनैरेव कतकैः कतकबीजरजोभिः विशोधिता शुद्धिं प्रापिता अत एव सु

यति-श्री-९

भगवत्याः सरस्वत्याः स्वदने रोचने सकामामिति शेषः अत्र कीर्तनानां फलकल्पतरूपत्वेन सकलदोषनिःशेषनिवर्तनक्षमत्वं गम्यते श्लि
ष्टाश्लिष्टरूपकालंकारः १९ ॥ ॥ अनुकल्पेति सततां सम्स्तुतपाणां अनुकल्पभूतं भगवत्पादारविंदं यस्य तं मुख्यः स्यात्प्रथमः क
ल्पोऽनुकल्पस्तु ततोऽधमः इत्यमरः भुंक्ते भोगान्न विदितनृपः सेवकस्याभ्रकादिरिति न्यायेन रामानुजचरणारविंदे असाधारणेन
रक्षणैकप्रवणतया जगति भगवत्पादारविंदस्यानपेक्षणीयतया अनुकल्पतुल्यत्वमिति भावः त्रयाणां धर्मार्थकामानां व
र्गस्त्रिवर्गः पंचरणां अजहत् न त्यजतीति न अजत्त्रिवर्गं धर्मार्थकामसाधनमित्यर्थः अपवर्गस्य मोक्षस्य वैभवमैश्वर्यं तत्साधनमित्य
र्थः अयुधानेनि वत्कारणैः कार्योपचारः चलाया अस्थिरत्वं चेतसि व्यापारस्य विनिवर्तनौषधं विनिवर्तनभेषजं यतीन्द्रचरणं

अनुकल्पभूतमुरभित्पदं सततामजहत्त्रिवर्गमपवर्गवैभवं। चलचित्तवृत्तिविनिवर्तनौषधं शरणं यतीन्द्र-
चरणं वृणीमहे २० ॥ स्मितावधूतपरवादवैभवान्निगमान्तनीतिजलधेस्तलस्पृशः। प्रतिपादयन्ति निग
निगमापवर्गिकीर्यतिसार्वभौमपदसान्त्वनाशयाः २१ ॥ यतीश्वरश्रीपादारविंदं शरणं वृणीमहे रक्षकत्वेन स्वीकुर्मः

सामान्ये एकवचनप्रयोगः अजहत्त्रिवर्गमित्यादिपदार्थस्य शरणवरणहेतुत्वान्पदार्थहेतुकं काव्यलिंगमलंकारः स च चलचित्तवृत्ति
विनिवर्तनौषधमित्यादिरूपकेन संसृज्यते २० यतिराजपदारविंदानुरागशालिनः सुलभयत्नेनैव वादिनो भजयन्ति निगमान्ता
र्थतत्वं निश्चिन्वन्ति मोक्षोपायं दर्शयन्ति चेत्याह स्मितेति स्मितेन निःश्वासेनैव स्मितेनानेन परवादिवैभवस्य तृणायमानत्वं
ज्ञाते अवधूतं निरस्तं परवादिनां वैभवं पाण्डित्यं यैस्ते तथोक्ताः निगमान्तानामुपषदां नीतयः अर्थनिर्णयिकन्यायाः एव जलधिस्त
स्य तलस्पृशः गाम्भीर्यज्ञाः यतिसार्वभौमस्य पदसान्त्वपदाधीनं यथा तथाकृतः आशयश्चित्तं यैस्ते तथोक्ताः आपवर्गिकीमपवर्गैक

राम ९

मूलेति महतां नानामन्त्राणां च निगमा वेदा एव द्रुमास्तेषां मूले उपक्रमभाग एव बुध्नदेशे मूलं बुध्नोऽङ्घ्रिनामक
इत्यमरः । निविष्टं स्थितं उपक्रमश्रावल्येनैव नानात्मयोः स्वनिर्णीतत्वान्मूलमित्युक्तं एतेन ऊर्द्ध्वदृष्टिकल्पितानां उपक्रमादन्यायविरो
धइति सूचितं घनारकेभ्यो भगवत्स्वरूपगोपयितावंचकेभ्यः ऊर्द्ध्वदृष्टिभ्यः भयं मुमुक्षुभ्यः परिहरन् धूनानः नैकेऽनेके दंडाय स्य सनथा
क्रः धूतदंडइत्यर्थः रंगेशभक्तजनानां मानसे स्वस्थानएव मानससरसि राजहंसः रामानुजो मुनिः स्वयं निर्हेतुककृपयास्वात्मनैव
नः अस्माकं शरणं रक्षकः अस्तु भवतु यथा कश्चिन्महारण्ये कश्चिद्धार्मिको राजभट्टो धूतदंडः सन् क्वचिद्वृक्षमूले स्थितश्चोरा
दिभयान्निवर्तयन्पथिकानां रक्षको भवति तद्वदिति भावः भीतानां भयहेतुरिति पञ्चम्यंतघनारकेश ᳵ स्व पंचमी भयेनेति
मूले निविष्टमहतां निगमद्रुमाणां मुक्त्यै घनारकभयं धुनुते नैकदंडः । रंगेशभक्तजनमानसराजहंसो रामा
नुजः शरणमस्तु मुनिः स्वयं नः २२ सन्मंत्रवित्नियमितिः यमिनां नरेंद्रः संसारजिह्मगमुखैः समुपस्थितं
नः विश्वक्सेनविषयलोभविषं निजाभिर्गाढानुभावगरुडध्वजभावनाभिः २३ ॥ चमीतत्पुरुषः तेभ्यो भयं नाम
नदुनार्थग्रहणे किमनिष्टं स्यादिति शंका नञर्थकस्य नशब्दस्यैकशब्देन सुप्सुपेति समासे नैकेति निरूपं २२ सन्मंत्रविदिति सन्मं
त्रं समीचीनाष्टाक्षरादिमंत्रं सर्पग्रहणमंत्रं च वेत्तीति सन्मंत्रवित् नतु हि ष्ठुतिहित्ने किश्च संयमिनां नरेंद्रः राजा सर्पग्राही च संसा
रः प्रकृतिसंबंध एव जिह्मगमुखानि सर्पमुखानि तैः समुपस्थितं प्राप्तं विश्वक्सेनानां ततं व्याप्तं नः अस्माकं विषयलोभं विष
यासक्तिमेव विषं निजाभिः स्वकीयाभिः गाढाः प्रगूढा अनुभावाः स्वेदरोमांचकंपाश्रुगद्गदस्वराद्यनुभवा यासु ताभिरन्य
त्र गाढो दृढ अनुभावः सर्पविषहरणसामर्थ्यं यासां ताभिर्गरुडध्वजस्य भगवतो भावनाभिर्ध्यानैः अन्यत्र गरुडरूपहरि

यतिः ही. १७ धृजस्य भावनाभिः क्षिपति हरति यथा व्यालग्राही गरुडभावनया विषं हरति एवं यतीन्द्रोपि स्वकीयभगवद्ध्यानमहिम्ना
अस्मदीयां सांसारिकविषयतृष्णां निवर्तयति अतो नास्माकं संसारभयमिति भावः श्लेषसंकीर्णरूपकालंकारेणोपमा-
ध्वनिः २३ ॥ ॥ यतिराजस्य व्याख्यानमुद्राचितकरे चित्रलेखकरांगुलिविन्यासविशेषरूपाकृतिर्योगिभिर्भिन्ने न विज्ञानचि-
त्रलेखनक्रियासु त्वेक्षते नाथ इति सदृशीनो ज्ञापकत्वेन प्रसिद्धः एषः प्रत्यक्षभूतो यमिनां नाथः यतीन्द्रः नखरश्मिजालैर्न-
खकिरणसंमूहैः अंतर्मनसि निलीनं लग्नं मदीयं तमः अज्ञानमेवान्धकारं अपनीय निहन्तु व्याख्यानकेलिरसिकेन व्याख्या

नाथः स एष यमिनां नखरश्मिजालैरन्तर्निलीनमपनीय तमो मदीयं वि-
ज्ञानचित्रमनघं लिखतीव चित्ते व्याख्यानकेलिरसकेन करांबुजेन २४

न क्रीडारसज्ञेन व्याख्यानमुद्राचिह्नितेनेति यावत्करांबुजेन अरविंदसदृशाकरेण चित्ते अनघं रम्यं विज्ञानं मोक्षप्रतिपादकशा-
स्त्रमेव चित्रं आलेख्यं लिखतीव लेखनं करोतीव मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोरित्यमरः अत्र मोक्षविषये धी-
ज्ञानं अन्यत्र मोक्षप्रतिपादकशास्त्रविषये शिल्पे च धीर्विज्ञानमित्यर्थः व्याख्यानमस्ति न देवाचार्याणामभिप्रेतमिति भाति राम
चित्रमिति रूपकानुरोधाच्चित्रस्य भित्तिरूपत्वगम्यत्वं अनेकदेशविवर्तिरूपकमनघ इति श्लिष्टरूपकं ताभ्यां सह लेखनक्रियो- १
त्प्रेक्षायाः अंगांगिभावसंकरः करांबुजेनेत्युपमाया सह ज्यते ॥ २४ ॥ ॥ ॥

उपनिषत्सूक्ष्मवस्तुग्रहणे योग्यं सूक्ष्मं नजन्यग्रयोगसाधारण्येन उपनिषन्निगूढार्थग्रहणमुद्रेक्षमाणो व्याख्यानमुद्रां ध्यायेमेत्याह
उद्गृह्णतीमिति अल्पधियामल्पबुद्धीनां नः अस्माकं चित्ते स्वयं स्वात्मना निवेशयितुं स्थापयितुं उपनिषत्सु निगूढं अति सूक्ष्म-
तया दल्पबुद्धिभिर्दुर्ग्रहं अर्थमभिधेयमेव वस्तु अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः उद्गृह्णतीमुद्ग्रहणं कुर्वतीमित्यस्य
नामित्यर्थः स्वजनकप्रयोगाद्रम्यामुत्प्रेक्षा प्रतिपन्नः प्राप्ताहस्तो यस्यास्तामुन्निद्रपद्मसुभगां अर्द्धोन्मीलितपद्मवद्रमणीयां ल-
क्ष्मणमुनेः श्रीरामानुजमुनेरुपदेशमुद्रां व्याख्यामुद्रापरपर्यायां ध्यायेम २५ रामानुजार्यश्रीहस्तकीनां वेदान्तगर्भत्ववाख्याभ्यते.

उद्गृह्णतीमुपनिषत्सु निगूढमर्थं चित्ते निवेशयितुमल्पधियां स्वयं नः पश्येम लक्ष्मणमुनेः प्रति-
पन्नहस्तामुन्निद्रपद्मसुभगामुपदेशमुद्रां २५ आकर्षणानि निगमान्तसरस्वतीनामुच्चाटनानि
बहिरन्तरुपप्लवानां पथ्यानि घोरभवसंज्वरपीडितानां हृद्यानि भान्ति यतिराजमुनेर्वचांसि २६ ॥

रसकलन्ध्यानिवर्तकत्वं संसारसंतप्तहितत्वमत्वं चाह आकर्षणानीति निगमान्तसरस्वतीनां वेदान्तविद्यानामाकर्षणानि आक-
र्षणसाधनानि बहिरुपप्लवा रोगादयः अन्तरुपप्लवा रागादयः तेषामुच्चाटनानि निवृत्तिसाधनानि उभयत्रापि करणे ल्युट्
आकर्षणोच्चाटनशब्दाभ्यां मन्त्रसाम्यं ध्वन्यते अत एव घोरेण भयंकरेण भवसंज्वरेण संसारतापेन पीडितानां बाधितानां प-
थ्यानि हितकराणि हृद्यानि प्रियाणि पथ्यमपि प्रियं दुर्लभं प्रियत्वे पथ्यत्वं दुर्लभं अनन्ताभ्यामाह त्वत्स्वादि साम्यं ध्वन्यते यति-
राजमुनेर्वचांसि वाक्यानि भान्ति लोकसंरक्षणाय जाग्रति अतस्तान्येवाध्येतव्यानीति भावः २६ ॥ ॥

घ·वि·
टी·
८
8

शीतेति रामानुजः शीतस्वभावेन दयामृदुस्वभावेन शीतस्पर्शयुक्तस्वभावेनेति गम्यते सुभगः अत्यंतानुकूलः अनुभवः सेवा
यस्य तथोक्तः शिखावान् अग्निः तेजोविशिष्टत्वेनाग्नित्वरूपेण प्रसिद्धाग्निस्तु उष्णस्पर्शेण प्रतिकूलानुभवः अपि तु नहि लक्षणइ
तिव्यतिरेकविशिष्टरूपकं दोषावमर्दं पापनिवर्तनेरात्रिनिवर्तनं इति गम्यते सापेक्षव्ययदोषेनिरस्तमालानियतात्र वंश्यमावि
नीउन्नतिर्माहात्म्यं यस्य स तथोक्तः ओषधीशः चंद्रः जगदानंदकारित्वात् चंद्रत्वरूपेण प्रसिद्धः चंद्रस्तु दोषाकरत्वनियतोन्नति
रिति नहि लक्ष्यरूपविशिष्टरूपकालंकारः पूर्ववत् प्रजानां तापानुबंधनस्य सांसारिकाध्यात्मिकादितापसंबंधस्य शमनः नि

शीतस्वभावसुभगानुभवः शिखावान् दोषावमर्दनियतोन्नतिरोषधीशः ता
पानुबंधशमनस्तपनः प्रजानां रामानुजो जयति संवलितत्रिधामा २२ ॥

वर्तकः तपनः सूर्यः जगत्प्रकाशकत्वात् सूर्यत्वनिरूपणेन प्रसिद्धः सूर्यस्तु तापानुबंधवर्द्धन इति नहि लक्षणविशिष्टोऽत्रापि रूप
कालंकारः अत एव संवलितः संसृष्टः त्रिधामा भगवान् यस्य स तथोक्तः त्रिधामा केशवः अनल इति वैजयंती संसृष्टानि त्रयाणा
मग्निचंद्रसूर्याणां धामानि यत्र स च गम्यते एवंविधः सन् जयति सर्वोत्कर्षेण वर्तते अत्र संवलितत्रिधामेति श्लेषमूलकाभे
दातिशयोक्तिः तत्र पूर्वोक्तरूपकत्रयस्य वाक्यार्थहेतुत्वान्नानेकवाक्यार्थहेतुककाव्यालंकारः २२ ॥ ॥
रामायनमः ॥ ॥ ॥ ॥

राम
८

जयतीति सकलविद्या एव वाहिन्यो महानद्यः तासां जन्मशैलः उत्पत्तिपर्वतः महानद्यो हि महापर्वतेषु जायंते तद्वत्सकलविद्यानामुत्प
त्तिस्थानमित्यर्थः जनिपथजन्ममार्गो देवनिर्पंडः मनुष्यस्थावरादिजन्मपरंपरायां परिदृढस्याप्युनः पुनर्भ्रमणेन श्रांतानां श्रमं प्राप्तानां वि
श्रांतिशाली विश्रामापादकः श्रमहरेण इत्यर्थः निखिलानां कुमतिमायानां कुदृष्टिपरिकल्पितभावरूपाज्ञानानां नामेव शार्वरी,
रात्रीणां बालसूर्यः अव्यवधानेन निवर्तकः मायावादिनो हि सदसदनिर्वचनीयं मायाशब्दवाच्यभावरूपाज्ञानं जगत्कारण
मिति वदंति तत्र लक्षणप्रमाणस्वरूपादिखंडनेन तन्निवर्तक इति भावः निगमजलधीनां वेदसमुद्राणां वेलाभिवृद्धिरेव,

जयति सकलविद्यावाहिनीजन्मशैलो जनिपथपरिखिन्नश्रांतविश्रांतिशाली निखिलकुमतिमायाशर्व-
रीबालसूर्यो निगमजलधिवेलापूर्णचंद्रो यतींद्रः २७ मुनिवक्रमतसारा मुक्तिनिश्रेणिकेयं सहृदय-
हृदयानां शाश्वती दृष्टिसिद्धिः शमितदुरितखेदा सप्तमीद्रस्य सूक्तिः परिचिनुत गहनानः प्रस्तुवीत

जलवृद्धिस्तस्याः पूर्णचंद्रस्तदाह्लादक इति भावः वेलाब्धितीरभिवृद्ध्योरिति वैजयंती जयति सर्वोत्कर्षेण वर्तते अस्मिन्वृत्ते परंपरि
तरूपकालंकारः पादचतुष्टयेप्येवं षष्ठ्येणकयानात्समस्तनाम गुणः प्रसिद्धान्यपदत्वात्सादस्य २८ इतः परं वक्रभिः श्लोकैस्तत्सू
क्तिप्रशंसामाह मुनिवक्रमतेत्यादिना मुनिभिः पराशरादिभिः वक्रमतो वक्रमानं प्रापितः सारः स्थिरांशो यस्याः सा तथोक्ता परा
शरादिवक्त्राधिसंवादित्वात्तद्वक्रमनतं मुक्तेर्निश्रेणिका अधिरोहिणी प्राप्तिसाधनमिति यावत् निश्रेणीत्वधिरोहिणीत्यमरः सहृ
दयहृदयानां सरसजनचित्तानां शाश्वती स्थिरा दृष्टिसिद्धिः दृष्टिलाभः चक्षुरिव सकलार्थदर्शिनीति यावत् सप्तमीद्रस्य सूक्ति
विरहित्वयतमेवस्यादिति भावः शमितः विनेतेभ्यः कुदृष्टिवाहोभ्यः खेदाय यासा तथोक्ता यद्वा विमलानां मनस्सु तत्संस्थमनस्सु तं,

प·ति
टी·
२
१

रन्यमित्यग्रहेणनिर्वाहणद्भुः त्वेषामितोयथासासर्वमनत्वेडुनीतिभावः परिक्लिन्नाश्रमस्थापि गहनागंभीरार्थेनयादुरवग्रहा
परिचितगहनार्थसंपर्मीद्रस्यपतीद्रस्यसूक्तिः अस्माकंप्रसादंप्रस्नुवीत स्वयंप्रदुग्धांस्तुः प्रस्नवणेइतिधातोकर्मकर्तरि प्रार्थनायांप्रा
लिङ्. कर्मवत्कर्मणातुल्यक्रियाइतिकर्मवद्भावादात्मनेपदं नदुहस्नुनमांयक्चिणाविति प्रतिषेधाद्यकलुग्विकरणस्यताङ्क्षयो.
लुक् २९ ॥ ॥भवेतिभवःसंसारएवमरुर्निर्जलभूमिस्तत्रपरिक्लिन्नानांपथिनःखेदंप्राप्तानांस्फीतपानीयसिद्धिः संपत्स्थापनि
वर्तकाआनंदकरीतिभावः दुरितदूषितानांपिजिह्वाहतस्यक्षीरमिवविरुद्धतेनप्रतिभासतइतिभावः कुल्यास्यकृत्रिमासरिदि

भवमरुपरिखिन्नस्फीतपानीयसिद्धिर्दुरितरहितजिह्वादुग्धकुल्यासमुल्ला स्फुति
नयनसनाभिःशोभतेलक्ष्मणोक्तिर्नरकमथनसेवास्वादुनाडिंधमानः ३० ॥ ॥

त्यमरः स्फुतिर्नयनमिवस्फुतिनयनेनसमानाभिः दायदः एकार्थप्रतिपादिकेतियावत् सपिंडास्तुसनाभयइत्यमरः यद्वास्फु
तीनांनयनेभगवान्वेदचक्षुःसनातनःदिव्यंचक्षुःस्फुतिपरिषदामित्युक्तेः तस्याःसनाभिः बंधुः तत्तुल्यप्रशंसिनीतियावत् नःअ
स्माकंनरकमथनसेवायाभगवत्सेवायाआस्वादस्यरुचेःअभिलाषरूपानुभवस्येतियावत् यानाडिंधमतिद्रावयतीतिनाडिं
धमानाडिंशब्देनभगवत्सेवास्वादहेतुभूतचित्तवृत्तिविशेषउपचर्यतेतस्याद्रावणंनामयेनांतरंगंद्रवतिसस्नेहइतिकथ्यते राम
इतियावत् रसीभूयानंदप्रवणतापादनंलक्ष्मणार्यश्रीसूक्तिःस्रोतृणांचित्तद्रावणेनभगवत्सेवास्वादविषयकानंदोत्सु २

नुरेयसंपाद्यतीतिभावः नाडिंधमेत्यनेन स्तुवर्णादिद्रावणकरस्वर्णकारस्तामयगम्यते तेनातिकठिनमपिचित्तंभगवत्सेवावि-
षयेऽश्मानंद्रवर्णं करोतीति द्रवीतिरस्याद्द्रवाहयतीति स्वफलनिलक्षणात्क्तिः शोभतेप्रकाशतेकुलेयत्यत्रकुलस्याद्यन्मेत्रीकुल्या
स्थ एवपदाद्न्यतरस्यांपञ्जोविति यस्मात्यसमानाकुल्यास्तकुल्यासमानस्यछंदसीत्यत्र समास्यतियोगविभागात्सभावः अर्था
न्ताहृदयपर्यवसानंकुलंयस्य कुलमिति विग्रहेनुसंशर्वपदत्वेन कुलोनत्वश्चिति खप्रत्ययप्रसंगात्सनाभिरित्यत्रज्योतिर्जनपदेत्यादि
नासभावः नाडिंधमेत्यत्रनासिकास्तनयोर्ध्माधेटोरिति खत्पतोधापेरशुच्छनोनाडिमुष्टयोश्चेति नाडिशब्दे उपपदे ध्माधातोः खप्रत्ययः
खयः शीतात्मार्थधातुकत्वेन शपू पाघ्राध्मेत्यादिना ध्माधातोधमादेशः परत्वंपंखित्यनव्ययस्येतिविंदतेउत्तरपदेत्यादिना डीश्यल
स्यडूस्वः अरुर्द्विषदिति मुमागमनतेष्टाप्एवं मुष्टिशब्दे उपपदे धेट पानेइत्यस्मात् वशिघपिद्ध्मापादेशा अरुर्द्विषदिति ममिमुष्टिं
धयश्चद्धः उत्तरवेत्स्केतिसमष्टिमुष्टिंधयपदेऽन्यत्र द्रष्टव्यः भवमरुपरिविविन्नेत्यत्रद्रूपकेंडुरितरहितेनस्वेत्रोपमाच्छतिनयनेन त्यचेकै
वलद्रूपकमित्येतेषांसंसृष्टिः २०॥ ॥

यति. टी. १० क

10

हरिपदेति हरिपदस्य भगवत्पादस्य मकरंदं तदनुध्यानमेवानंदवहत्वान्मकरंदत्वेनाध्यवसीयते प्रवाहयंतीति मकरंदस्यं-
दिनः अनुगता अनुसृता बहवः शाखा एव वृक्षाश्च येषां ते तथोक्ताः शमिता दुरितगंधाः पापसंबंधा यैस्ते तथोक्ताः गंधो गं-
धकस्त्वामोदे लेशे संबंधगर्वयोरिति विश्वः वृक्षपक्षे शमिताः पुष्पसौरभ्येणान्यकृता दुरितगंधाः दुर्गंधा यैस्ते तथोक्ताः स्वपदः स-
यमीन्द्रप्रबंधा एव कल्पकतरवो युक्तिनानां वेदांतसिद्धांतवादिजनानां मनीषाकल्पनानां बुद्धिविशेषकल्पनानां कल्पवृक्षाः अभि-
तार्थप्रददेवतावृक्षाः संश्रितानां मामाश्रितानां तापसंसारिकाध्यात्मिकादितापमेवोत्पतापं उन्मूलयंति उच्छेदयंति कल्प-

हरिपदमकरंदस्यंदिनः संश्रितानाममनुगतबहुशाखास्तापमुन्मूलयंति शमितदुरितगंधाः संय-
मीन्द्रप्रबंधाः कपटकजनमनीषाकल्पनाकल्पवृक्षाः २१ नानाभूतैर्जगति समयैर्निर्मलीलाविधि-
ज्ञोरंस्यवर्णप्रव्ययतिविभोरादिमव्यूहभेदे विश्वत्रातुर्विनयनियतं व्यंजितानुग्रहः सन्विष्वक्सेनोप-
नियतिरभूद्देवसारस्त्रिदंडः २२ ॥

वृक्षाणां यथेष्टार्थप्रदानेन महोन्नतमेवं संयमीन्द्रप्रबंधानां बुद्धिविशेषकल्पनाप्रदानेन महोदारत्वमिति कल्पवृक्षरूपणं अनु-
गतबहुशाखा इत्यादि श्लिष्टरूपकमिति तयोः संकरः स्रग्धरामित्यादिकारणात्संप्रज्ञायुक्तुतिसुत कल्पनाशब्दः २१ भग-
वति लीलापरत्वेनेक कलिमाश्रित्य बाह्यकुदृष्टितन्त्राणि प्रवर्तयंति साधुरक्षणाय विष्वक्सेनो रामानुजरूपेणावतीर्ण इत्याह ।
नानाभूतैरिति नानाभूतैर्विकृतप्रकारैः समयैर्बाह्यकुदृष्टिसिद्धान्तैः जगति निर्मलीलापरस्य राक्षसपरूपपरिहासविलासं-
विधित्सोर्विविधानुसिद्धार्विभो भगवतः आदिमव्यूहभेदे त्रिव्यूहपक्षे आदिमूर्तसंकर्षणव्यूहे पद्मा च चतुर्व्यूहपक्षे द्वितीये

राम १०

पि संकर्षणस्यानंतरस्य रूपक्षेस्मादित्वादंत्यशापतिकोटिर्वेनादिमेत्युक्तं अत एव भेद शब्दप्रयोगः प्राक्तुल्याद्वासुदेवः पर इति क-
थितो मुक्तभोग्यो वलाद्याज्ञो ग्यत्वं कर्षणत्वं हरसि विनतुष शास्त्रमिति संकर्षणस्य शास्त्रकर्तृत्वान् अ से वर्णक्रमस्य वर्णं प्रथयति
प्रकटयति मनिकलिमास्त्रयतीत्यथः कलौ शूद्रस्य कृत्स्नरूपतोक्तेः तदुक्तं तन्त्रयामलके कुमारवेदाचार्यैः एतेषां चतुर्णामपि
व्यूहानां कृतत्रेतादियुगभेदेन सितरक्तपीतकृष्णवर्णाः इति भगवतः कलिमाश्रित्य समयप्रवर्तनेन प्रमाणं शान्तिपर्वणि मोक्षधर्मे
ततः कलियुगस्यादौ भूत्वा राजनतुः श्रुतः भाषयामास ग्रन्थेनैव धर्मं एजगद्धितं वदन् काषायवस्त्रसंवीतो मुंडितः शुक्लदंडवान्
शुद्धोदनसुतो बुद्धो मोहयिष्यामि मानवान् शूद्राः श्राद्धेषु भोज्यन्ते मयि बुद्धत्वमागते भविष्यन्ति नराः सर्वे मुंडाः काषायसं-
वृताः विप्र इति जगद्धितेन येन शिक्षणेन नियतेनियमस्तुक्तं यथा भवति तथा ज्ञानुग्रंजितः त्वमेव रूपेण वर्तीर्णः सन्मार्गप्रवर्त-
नेन साधुसंरक्षणं कुर्विति भगवता प्रकटीकृतः स्वनुग्रहो यस्य स तथोक्तः विघ्नकेतनः असौ यतिपतिः एतदप्रतीडः सन्नज्ञात
इति शेषः वेत्रसार इत्रिदंडो जानस्याधः उभयत्रापि व्यंजकाप्रयोगाद्भ्योत्प्रेक्षा यथा लोके कश्चिद्राजा स्वपंक्तिविक्रीडाकर्मण्यास-
क्तः सन् जगद्रक्षणकार्यमन्यत्र मंत्रिणि नियच्छति तद्वदिति भावः प्रथयन्निव मनेतश्चितोद्यवनारोत्प्रेक्षा प्रकरणेन निबंधनियमस्या-
स्य श्लोकस्येह निर्वंधनं विद्यासुखेन रक्षकत्व प्रस्तावेनेति ध्येयं एवमेतत् श्लोकार्थो मम प्रतिभाति सा प्रज्ञायिको न्योप्यास्ति चेत्स-
द्भिर्विचार्य लेखनीयः २२ ॥ ॥

यति टी. ११

लक्ष्यमिति । कुड्डे लक्ष्यं शास्त्रलक्ष्यमिव सूक्ष्मवस्तुद्विभेद्यमित्यर्थः । ललिताया मनोहरायाः रसनायाः लास्यलीलानृत्यविलास-
स्य निधानं मूलकारणं जगति लोके स्तुत्यास्वादं केवलस्वादुत्वयुक्तं किमप्यनिर्वाच्यं वस्तु रसनालास्यलीलानिदानं स्तुत्यास्वा-
दं केवलस्वादुत्वयुक्तं किमप्यनिर्वाच्यं वस्तु रसनालास्यलीलानिदानं स्वदमिति पदद्वयेन शर्करामिलितदुग्धादिसाम्यं व्य-
ज्यते नः अस्माकं श्रोत्रयोर्दिव्यौषधं श्रोत्रजाड्यनिवर्तकं सुखहेतुभूतौषधविशेषः लक्ष्मीकान्तस्य श्रियः पतेः स्फटिकमुकुरः
मणिदर्पणः दर्पणो यथा स्वरूपप्रकाशकस्तथायं तत्स्वरूपप्रकाशक इत्यर्थः । लक्ष्मणार्योपदेशः श्रीरामानुजार्यश्रीसूक्तिल-

लक्ष्यं कुड्डे ललितरसनालास्यलीलानिदानं स्तुत्यास्वादं किमपि जगति श्रोत्रदिव्यौषधं नः ।
लक्ष्यालक्ष्यैः सितजलधिवद्भातितात्पर्यरत्नैर्लक्ष्मीकान्तस्फटिकमुकुरो लक्ष्मणार्योपदेशः २२

क्ष्यैः स्पष्टप्रकाशमानैः अलक्ष्यैः स्पष्टमप्रकाशमानैः स्वतात्पर्यरत्नैः रत्नसदृशतात्पर्यैः अन्यत्र तात्पर्यसदृशरत्नैः सितजलधिवत्
क्षीरसमुद्रेण तुल्यं तेन तुल्यं क्रिया चेद्वतिरिति वतिप्रत्ययः भाति प्रकाशते जलधिवदिति तद्धितगा या पूर्णोपमा उपदेशे लक्ष्मर-
रूपणाद्धुद्धिश्रयत्वं गम्यत इत्येकदेशविवर्तिरूपकं किमपि दिव्यौषधमिति च मालानिरवयवं तो भ्यासः सहोपमायाः संसृष्टिः सितज- राम
लधिवदित्युपमाया लक्ष्मणार्यश्रीसूक्तेरतिगम्भीरत्वप्रसन्नत्वमधुरत्वमनोहरत्वशीतलत्वानि व्यज्यन्ते २२ ॥ ॥ ११

॥ ॥ ॥

यतिपतिसंप्रदायलब्धानंदा गजांतलक्ष्मीसंपन्निमपि तृणीकुर्वंतीत्याह स्थितिमिति यतिपतिसंप्रदायएव निरपायधनं राजदं
डाद्युपद्रवरहितं धनं आत्मोज्जीवनहेतुत्वात्तेन तद्रूपेण तेनोपचिताः प्रवृद्धाः मधुकराणां भ्रमराणां मौलिदघ्नेन शिरःप्रमाणेन मदेन
दंतुराणां विषमाणां मत्तानामिति यावत् दंतिनां गजानां घटनायाः पंक्तेः करटाः गंडाः तेषां कटाहाः कर्पराः एव करटकटाहास्तेभ्यो वह
न्तीति करटकटाहवाहिनस्ते च ते शीकरबिंदवस्तैः शास्फुरितां रमणीयाकृतां शीकरैः स्फारः रमायोरितिनिघंटुः शीकुरशब्दान्तके
येतीति एवं तानन्क्तप्रत्ययः अत एवातिमनोरथसिद्धिमंतीं मनोरथमभिलाषमतिक्रांतातिमनोरथासिद्धिर्यस्याः सा तीमतिमनोरथ

स्थितिमवधीरयंत्यतिमनोरथसिद्धिमंतीं यतिपतिसंप्रदायनिरपायधनोपचिताः मधुक
रमौलिदघ्नमददंतुरदंतिघटाकरटकटाहवाहिघनशीकरशीस्फुरितां २४ ॥ ॥

सिद्धिमतीं अभिलषिताधिकसिद्धिमिति यावत् स्थितिं संपदमवधीरयंति तिरस्कुर्वंति वक्तुलमतन्विदर्शिनमिति चुरादिषु वऊ
लग्रहणेदवधीरधातुः सिद्धस्याऊः गजांतलक्ष्मीसंपन्नेभ्यो यतिराजसंप्रदायसमृद्धा एवाधिका इत्येवास्त्रयणीया इति भावः
अतिमनोरथसिद्धिं अतिंइस प्रजुनवक्रूव्रीहिः निवोहोभवंतुमनुपादयुद्दस्य स्यानित्यताः प्रयत्नेन सर्वेधनीत्यादिवत्कर्मधारयान्मत
धीयप्रत्ययः मौलिः प्रमाणमस्येत्यर्थे प्रमाणेद्वयसच्दघ्नच्प्रत्ययः मौलिदघ्नेति सोशष्टजं नामगुणः अत्युज्ज्वलत्वं बंधस्य का
यकातिरिति कांतिस्त्रय्ओजः समासभूयस्त्वमित्योजस्त्वं चेति ओजःकांतिगुणोपेता गौडीपारितरिष्यतइति गौडीरीतिः २४
॥ ॥ ॥ ॥

स्फुरितां

यति· टी· १२ 12 यतिराजस्य श्रीसूक्तिप्रभावसमुन्मिषिता कीर्तिः परमवैदिकैर्दिगन्तेषु जोघुष्यत इत्याह अनुपधीति अनुपधि जीवनाद्युपाधिरहितं
यथा तथा रंगनृत्तरसिकान् श्रीरंगस्थलवासीनि मतः नाट्यस्थलव्यापारचतुरान् अभितांडवयन् अभितस्तांडववतः कुर्वन् नृ-
त्तोल्लासवतः कुर्वन्नित्यर्थः अत्र नाट्यवतः कुर्वन् तांडववच्छब्दात् करोतीति णिचि णाविष्ठवदिष्ठवद्भावे इन्मतुपलुक् ततो लटः शत्रा-
देशः निभृतैरनन्यपरैर्निगमविमर्शकेलिस्वावेदार्थविचारविलासे निरतैरासक्तैः परमवैदीकैः अन्यत्रनाद्यागमवेदिभिः विधृ-
तः विशेषेण स्वीकृतः यतिराजयश एव पटहः आनकः पटहोऽस्त्री स्यादित्यमरः पटत्कृत्यं जहातीति पटहः पृषोदरादित्वात्का

अनुपधि रंगनृत्तरसिकानभितांडवयन्निगमविमर्शकेलिनिरतैर्निभृतैर्विधृतः ।
गुणपरिणद्धसूक्तिदृढकोणविघट्टनया रटति दिशामुखेषु यतिराजयशःपटहः ३५

रलोप इत्याहुः गुणैः प्रसादमाधुर्यादिभिरेव रज्जुभिः परिणद्धः संबद्धः सूक्तिरेव दृढकोणः स्थिरदण्डः कोणो वीणादिवादनमित्यर्थः
तस्य विघट्टनया संघर्षणेन दिशामुखेषु अग्रभागेषु रटति ध्वनति यथा पटहाख्यवाद्यविशेषः केलिनिरतैर्ध्रियमाणो गुणबद्धः
कोणेन वाद्यमानः सन् नाट्यस्थलेन टात्रनेयन् दिङ्मुखेषु ध्वनतीति तद्वद्यशोऽपि सूक्तिसंबंधेन सकलदिङ्मुखेषु प्रसिध्यति राम
श्रीरंगवासिनो हर्षनृत्यापन्नचित्तान् करोतीति भावः घटिवंचिविदिभ्य इति स्त्र्यधिकारस्थो युच् विघटनाशब्दः यशोऽर्थः पटहो १२
यशःपटह इति न भ्रमः कार्यः सूक्तेः कोणत्वरूपणलिंगात् पटहत्वं यशसः प्रकाशकत्वसाम्यात् पटहत्वरूपणं रूपकालंकारः ३५॥

इदंप्रथमेति अप्रथमेन त्वाल: प्रथमो यस्मिन्कर्मणि तद्यथा भवति तथा इदंप्रथममेतदादिसंभवतां तुल्यप्रथमानानां पूर्वं मे तानि,
न संतिमध्ये उत्पन्नानीति तेषामर्वाचीनत्वं दर्शितं कुमतीनां जलानि समूहास्तेषां कूलंकषाः मूलोच्छेदिकाः एषामेतानि माथि
ता हा मतान्येव विषानला विषाग्रयस्तैर्ज्वलितानां दग्धानां संसारविषद्रुमानष्टानामिति यावत् जीवानां प्राणिनां जीवातवो जी
वनौषधानि दिव्यमूलिकादिरूपा इत्यर्थः चिरंतनसरस्वतीनां श्रुतीनां चिकुराः कुंतलस्थानीया वेदांतास्तेषां वेषे परिस्कारवि
शेषविषये सैरंध्रिकाः अलंकर्त्र्यः सैरंध्री परवेश्मस्या स्ववशा शिल्पकारिणीसमागम्येन त्वकेशपाशस्तु स्निग्धकृत्वा सम्यक्प्रसा
धनादिभिस्तदंतयंत्यीः परिहृत्य सम्यग्बध्वा चूडामण्यादिभिरलंकरोति एवं रामानुजार्यश्रीसूक्तयः अति चित्रावानलकु

इदंप्रथमसंभवत्कुमतिजालकूलंकषा मतविषानलज्वलितजीवजीवातवः अ
स्त्यमस्तमक्षरं यतिपुरंदरस्योक्तयश्चिरंतनसरस्वतीचिकुरवेषसैरंध्रिकाः २६ ॥ ॥

र्वंतीति भावः यतिपुरंदरस्य यतिराजस्योक्तयः अक्षरं नाशरहितं अमृतं मोक्षं क्षरं निश्चनिपादयंतीत्यर्थः मुक्तिः कैवल्यनिर्वाण:
श्रेयोनिःश्रेयसामृतामित्यमरः अमृतेक्षरं तीत्यनेन मधुपक्षोद्धेकोशादिसाम्यं च विधत्ते कूलंकषा इत्यत्र कूलंकषतीति विग्रहः
सर्वकूलाभ्रकरीषेषु कषः इति खच् अरुर्द्विषदिति मुमागमः अयं चेतोरत्नाख्यो नामगुणः पूर्वोत्तरार्द्धयोः स्वरारोहावरोहयुक्त
त्वान्निगतिर्नामगुणः ओजः कांतिः गुणोपीत त्वाझोडीरीतिः पदानामन्योन्यविनिमयासहिष्णुत्वाच्छय्यासुद्धि: जीवजीवेतिद्वयो
र्व्यंजनयुग्मयोरावृत्त्या छेकानुप्रासः षकारक्षकारसानुस्वाररेफमकारनकारयुक्तधीरादीनामवृत्त्यानुप्रासः अक्षरंक्षरं

यति. टी. सुधाशनेति सुधाममृतमश्नंतीति सुधाशना देवाः तेषां दुर्ग्रहाः सुष्ठु दुर्लभाः देवानामपि दुष्प्रापा इत्यर्थः याः स्फूर्तयस्ता
सां समष्टेः समूहस्य मुष्टिंधयः अंजलिपायी सकलस्फूर्तिसंग्राहक इत्यर्थः नानावक्रकवादिवाक्यसंदर्भः कथासौवाह
वो युद्धे तेगतानुप्राप्तान् कपटसौगतान् प्रच्छन्नबौद्धान् मायिन इत्यर्थः खंडयन् लक्ष्मणेप्राप्तप्रसयः असौ लक्ष्मणमुनिः मुकुं
१२ 13 दगुणएव मौक्तिकानि तेषां प्रकरस्य समूहस्य शुक्तिभिः मुक्तास्फोटैः मुक्तास्फोटः स्त्रियां शुक्तिरित्यमरः सूक्तिभिः अंजसा
हृतावक्रवणसमय एव प्रसिद्धार्थपदतया अर्थपर्यालोचनाविलंबो नास्तीति भावः मनसि अस्माकं चित्ते मुदं संतोषं उदंचयति

सुधाशनसुदुर्ग्रहस्फुतिसमष्टिमुष्टिंधयः कथाहवमसौगतान् कपटसौगतान् खंडयन् मुनिर्मन॰
सि लक्ष्मणो मुदमुदंचयत्यंजसा मुकुंदगुणमौक्तिकप्रकरशुक्तिभिः सूक्तिभिः ३७ कपर्दिमत॰
कर्दमं कपिलकल्पनावागुरां दुरत्ययमतीत्यनन्द्रुहिणतंत्रयंत्रोदरं कुदृष्टिकुहनामुखे निपततः
परब्रह्मणः करग्रहविचक्षणो जयति लक्ष्मणोऽयं मुनिः ३८ ॥

उत्पादयति मुष्टिंधयशब्दो नाडिंधमशब्दवत् उत्पादनस्य लेख्यस्यादिभिः रूपकानुप्रासानां संसृष्टिः ३७ लोके मृगयानत्य
रामृगग्रहणाय मृगागमनमार्गे कर्दमं कुर्वंति वागुरां प्रसारयंति यत्र कुहराणि विद्धंत्येव तिकरालविनाश्यान् शुनकान्॰
भिमुखे स्थापयंति तत्समाधिं परं ब्रह्मस्वमतेया नयतां तत्र ब्रह्मादीनां वदन् रामानुजमुनेस्तदुद्धारकत्वमाह कपर्दीति राम
कपर्दिमतं पाशुपतमतमेव कर्दमं पंकम् अतीत्यातिक्रम्य कपिलकल्पना सांख्यप्रवचनमेव वागुरा तां चातीत्य वागुराम्॰ १२

गंधिनीत्यमरः दुरत्ययं दुरतिक्रमं दुहिणं तं हि हिरण्यगर्भमनमेव यं ज्ञो दंदं दाहशिलामयादि यं त्र ऊहरमनीत्यपत्सुरसामंज

स्यानर्चनानुपपन्नेश्वरानुमानं प्रवृत्तिः निश्चयेनेन योगः प्रस्तुतः इत्यादिभिः सूत्रैः तन्निरासस्य प्रामाणिकत्वस्थापनादनीश्वरेति

नन्वदनिक्रमोक्तिः ऊहदृष्टीनां कुहनायामायायामुखेन हि यं वेददंति मायाविशिष्टं ब्रह्म जगदुपादानं ब्रह्मव्यतिरेकेण सर्वं

मिथ्येति निपतितः प्रविष्टान्तः वेदांसि करस्त्राभिप्रेतत्वेनेव तन्मतकल्पनानिपतनत इत्युक्तं परब्रह्मणः करणग्रहणकार्यग्रहः

ग्रह हृद्रहनि श्रिगमे श्रुतिस्त्रच प्रत्ययः करसहृदयन्यायबलेन मायायाः स्पर्शपरिहृत्यनिर्द्रुमणाभिनिनात्पर्यंतत्र वि चक्षणाः ऊ

मूलेः अर्थपंक्तो करक्षकत्वेन प्रसिद्धः लक्ष्मणस्तु निर्जयति सर्वोत्कर्षेण वर्तते यथा कश्चिद्दयालुः स्वनकादिस्तु खमियुनं तं क-

रेण बलात्कृष्य रक्षति न हृदयं लक्ष्मणमुनिः हृत्स्य हृदयन्यायबलेन ब्रह्मणो मायावरोधकल्पनां परिहृत्य हृदयप्रतिभटत्वक-

ल्पनां परिहृत्य हि यथा प्रतिभट्टत्वकल्पनाकरत्वादिस्वरूपरक्षितत्वानि निभावः यदि रामानुजमुनिर्न स्यात्तदा ब्रह्मणो मायाः

वच्छिन्नत्ववादिभिस्तत्स्वरूपस्यापहृतत्वेन कस्याप्यनाहृतशब्दब्रह्मज्ञानाभावादुभयलिंगविशिष्टब्रह्मणः सत्वेप्यसत्त्वापत्त्या स्व-

रूपहानिरेव स्यादिति केचित्तु यथा कृपादिस्तुपतनोहस्तगृहीतो रक्षतीत्येवं करस्य ग्रहविचक्षण इति कृपादिपतनसाम्यम-

भिप्रेत्य व्याचक्षते तत्रस्तु खशशृंगस्य स्यकर्दमादिप्रक्रमानुगुणाभावः ब्रह्मणः करग्रहणस्य मुख्यास्यासंभवेन लक्षणया-

त्तल्लक्ष्यार्थासंभवश्च बलात्काररत्न विवक्षायां न्यायबलेन प्रतिपादनरूपार्थस्यालाभः तथा त्वेक च ग्रहविचक्षण इत्येव वाच्यः

यं ज्ञो दरमित्यत्रोपमितं व्याघ्रादिभिः सामान्यप्रयोगः इति विहितोयमिति समासासंभवेन रूपकत्वव्यवस्थितत्वेन प्रायपाठेना-

न्यत्रापि तथानिश्चयात्कुहनामुखइतिश्लेषः करग्रह इति रूपकानि प्रायोक्तिरित्यादिभिरनुप्राणितामग्रग्रहणाव्यवहारप्रती-

तिरिति समासोक्तिः सर्वं ब्रह्मानुशासनेति संसृष्टिः २९ ॥

य॰ति॰
टी॰
२४
15

कणादेति कणादस्य परिपाटिभिः अनुक्रमैः परिपाटिरनुक्रमः इत्यमरः तत्सिद्धान्तरीतिभिरित्यर्थः कपिलस्य कल्पनानाटकानी
व कपिलकल्पनानाटकानि तैः नाटकानि विचित्रवेषाभिनयादिभिर्यथा विस्मयं कुर्वन्ति तद्वत्कापिलमपि विचित्ररू
पतया आश्चर्यरसावहत्वान्नाटकैरित्युक्तं कुमारिलानां कुभाषितैः कर्मैव स्वतन्त्रमित्यादि कुमतिनवाक्यैः गुरोः प्रभाकरस्य निबंधग्र
न्थरूपा ग्रंथयन्त्राभिरतिकठिनैः तथा ग्रंथिभिरित्युक्तं तथागतानां बौद्धानां कथाशतैः जल्पवितंडादिकथाशतैः तदनुसारिणा

कणादपरिपाटिभिः कपिलकल्पनानाटकैः कुमारिलकुभाषितैर्गुरुनिबंधनग्रंथिभिः तथा
गतकथाशतैस्तदनुसारिजल्पैरपि प्रतारितमिदं जगत्प्रगुणितं यतीन्द्रोक्तिभिः २९ ॥ ॥

माध्यमिकानां जल्पैः प्रलापैः अपि प्रतारितं वंचितं तत्स्वस्वपारतन्त्र्यं नीतमित्यर्थः इदं च जगत् यतीन्द्रोक्तिभिः प्रगुणितं ऋजुकृतं आ
र्जवमिति प्रगुणो विनयमरः तत्तत्सिद्धान्तदुर्वासनाप्राप्तसंभ्रान्तिरूपबुद्धिवक्रतां परित्यज्य ऋजुभूततत्प्रमारूपगुणयुक्तं जगत्
यथा भवति तथा कृतमिति भावः परसिद्धान्तानां निर्वाहशक्त्यभावकल्पनारामानुजसिद्धान्तस्य सरलता गम्यते यतीं राम
द्रोक्तीनां भ्रमनिवर्तकत्वात्तावतात्वं गम्यते २९ ॥ श्रीरामाय नमः ॥ ॥ २४

कथाकलहे निकषाकलहे कथाप्रसंगरूपकलहे कौतुकं अभिलाष एव ग्रहः पिशाचस्तेन गृहीतानां कौतस्कुतानां कुतः कुतः इ-
ति वादिनां हैतुकानामित्यर्थः प्रयाजलधेः कीर्तिसमुद्रस्य संप्लवः सम्मृद्धिः तस्य ग्रसने निःशेषकरणे कुंभसंभूतयः अगस्त्यभूताः
सकलप्रतिवादिकीर्तिनिवर्तका इत्यर्थः यतिक्षितिभृतो यतीश्वरस्य अंघ्रिकोपासनप्रभावेन समीचोपासनमहिम्ना परिपक्वमाः
परिपक्वाः सम्यक्तिरूढाः सम्यक्स्वाधीना इत्यर्थः अप्रमिताः सम्यगवगता भारती संपदो येषां ते तथोक्ताः भारतीसंपदः सुधियः स-
मीचीनज्ञानवंतः जयंति सर्वोत्कर्षेण वर्तंते तेन दाश्रिता एवैवंभूताः रामानुजमुनिस्तु किमु तेति काव्यार्थापत्तिर्व्यज्यते कुतः कुतः

कथाकलहकौतुकग्रहगृहीतकौतस्कुतःप्रयाजलधिसंप्लवग्रसनकुंभसंभूतयः जयंति सुधियो य-
तिक्षितिभृदंघ्रिकोपासनाप्रभावपरिपक्वमप्रमितभारतीसंपदः ४७ यतीश्वरसरस्वतीसुरभिताः स-
यानासनावहामि चरणं भुजं प्रणतिशालिना मौलिना तदन्यमनदुर्मदज्वलितचेतसां वादिनां शि-
रः सुनिहितं मया पादमदक्षिणं लक्षणं ४८ ॥

शाशांक्यैषिकेश्रणिकस्कादिवान्सेनचकौतस्कुतशब्दः डुपचष्पाके इत्यस्मात्परशब्दांत्प्रत्ययेकप्रसंज्ञित्यमितितस्यानित्यमहि-
षपवात्केन निर्दिष्टमित्यर्थः अस्त्ययेपरिपक्वमशब्दः पूर्वपदअपि पोडी इति छन्दनुप्रासरूपकयोः संसृष्टिः ४७ यतीश्वरे-
ति यतीश्वरसरस्वतीसुरभिताशयानां यतिराजश्रीसूक्तिवासितचित्तानां सतामावहामि निष्ठानां चरणं भुजं प्रणतिशालिना प्रण-
मभाजा मौलिना शिरसावहामि तदन्येषां मते यतिराजादन्येषां मतेन योदुर्मदोदुरहंकारस्तेन ज्वलितचेतसां क्रूरचित्तानां
वादिनां शिरस्सु मया यतिराजशिष्यप्रशिष्येण मयेत्यर्थः अदक्षिणपदं वामपादो निहितं निक्षिप्तं लक्षणं समस्तजनैर्दृष्टम्

[illegible]

यति
दी १५

नात्र संकोचः इत्यर्थः वैदिकसाम्राज्यनिर्वाहार्थं दुर्मतभंगस्य कर्तव्यतान्न परनिंदादोषप्रसंगः गुरुस्तुतिपर्यवसायितान्नात्मश्लाघा-
दोषप्रसंगश्चेति द्रष्टव्यं ४१ ॥ ॥ श्रीरामानुजमुनिसिद्धांतमाश्रयस्व तेन न त्वं संसारभयं प्राप्स्यसीति स्वचित्तं प्रतिहितमुपदिशति भज-
स्वेति हे हृदय हे मनः अयमेव तत्काल आदिर्यस्यासाविदमादिः इदमादिर्न भवतीति अनिदमादिः साचसादुर्वासना अनिदमादिदुर्वासना
इति पा‥वत् तया यः कदध्वपरिवर्तनभ्रमः स्वर्गादिसाधनज्योतिष्टोमादिकाम्यकर्मरूपकुत्सितमार्गप्रवृत्तिः क्लेशः तस्य निवर्तनी-
मुमुक्षोरपि पापवन्मोक्षविरोधितया त्याज्यत्वात् स्वर्गोपि पातभीतस्य क्षयिष्णोर्नास्ति निकृतिरिति तत्फलस्य सुखाभासतया मुमुक्षोर-
पवर्गाभावाच्च हितोपदेशेन ततो निवर्तयतीत्यर्थः यद्वा अनादिदुर्वासनानुष्ठितदुष्कर्मवशप्राप्तस्वर्गनरकादिकुत्सितमार्गपरि-

15

= भजस्व यतिभूपतेरनिदमादिदुर्वासनाकदध्वपरिवर्तनभ्रमनिवर्तनीं वर्तनीं लभस्व हृदय स्वयं रथपदायुधा-
= नुग्रहद्रुतप्रहृतिनिस्त्रुटद्दुरितदुर्दिनीं निर्वृतिं ४२ ॥

भ्रमणक्लेशस्य निवर्तिकां संसारमोचनीमिति यावत् यतिभूपतेः यतिराजस्य वर्तनीं सिद्धांतमार्गं स्वयं स्वविवेकेन कुवादिविप्रलंभो-
पदेशमनंगीकृत्येति यावत् भजस्व प्राप्नुहि रथपदायुधस्य चक्रायुधस्यानुग्रहद्रुतप्रहृत्या अनुग्रहपूर्वकशीघ्रसंपातेन निस्त्रुटंति स-
द्यश्छिन्नानि दुरितान्येव निर्दिनानि दुरावरणं यस्याः तथोक्तां निर्वृतिं स्वात्मानंदसुखं मोक्षमिति यावत् लभस्व प्राप्नुहि वहिरंतस्तमः-
स्तोमादिज्योतिरूपसुदर्शनेयेनाव्याहतसंकल्पत्वमुल्लक्ष्मीधरैर्विवृतमिति चक्रस्य भगवत्संकल्परूपत्वाद्रथपदायुधे स्वं श्रीरामानुजसि-
द्धांतस्थित्या भगवत्संकल्प एव सकलदुरितानि निवर्त्य स्वात्मानंदानुभवं ददातीति भावः ननु हृदयस्यैव संसारमंडलक्लेशः तस्य
वसन्मार्गभजनं तस्यैव पापनिवृत्तिरित्यादिकं सांख्यमतप्रवेशापत्तिरिति चेत् हृदयस्यात्मदुष्कर्मतत्फलानुभवसाधनत्वेन कर्तृ-
त्वमारोप्य तथापदेशादिति मत अविचित्रस्योपदेश्यत्वं चान्योपदेशात् रूपेणेति ध्येयं चक्रायुधप्रहरणसंबंधेपि संबंधोक्तेरतिशयो-
क्तिः तथा दुरितदुर्दिनेत्र पानुधानादिवदन्यतो दुर्मोचत्व ~~रूपेणेति ध्येयं चक्रायुध~~ निःशेषनिकृतिश्च गम्यते उत्तरवाक्ये

राम
१५

हेते ११

नतामस्तनर्कजालजटिलेषु अतिविततगहनगंभीरेषु पूर्वपक्षादिग्रन्थेषु विद्यमानेष्वपि किमिति अल्पीयसि रामानुजवचसि एता
वद्गौरवमारोपयसीत्याशङ्क्य वादिशङ्कायां दृष्टान्तादिप्रदर्शनमुखेनोत्तरमाह कुमतिविहितेति कुमतिभिः कुदृष्टिभिः विहि
ताः ग्रथिताः ग्रन्थाः ग्रथितसदृशग्रन्थाः अतिकठिनग्रन्था येषां तेषां भवोक्ताः प्रभूतैः प्रचुरैः मतान्तरैः दिनरसिद्धान्तैः ग्रहिलानि सा
ग्रहाणि मनांसि येषां ते तथोक्ताः अतिकठिनग्रन्थप्रतिपादितानेकमतान्तराभिनिविष्टबुद्धय इत्यर्थः यतीश्वरस्य रामा
नुजार्यस्य श्रीसूक्तिं अल्पामतिसंकुचितां पश्यन्ति गणयन्ति नैतावता स्यान्न्यूनतेति भावः विकटायाः भूषणभावाकृत्यादिना

कुमतिविहितग्रन्थग्रन्थिप्रभूतमतान्तरग्रहिलमनसः पश्यन्त्वल्पां यतीश्वरभारतीं विकटमुरभिद्वक्षः
पीठीपरिष्कारलोचितः कुलगिरितुलारोहे भावी कियानिव कौस्तुभः ४३ स्थविरमतिमयस्तोमत्
स्यायां यतीश्वरपद्धतिं कुमतिभणितिक्षोभक्षीवाः क्षिपन्तु भजन्तु वा रसपरिमलस्थानाघ्राणाघोष
स्फुटस्फुटभेदनं लवणवणिजः कर्पूरं घ्रातुं किमित्यभिमन्यते ४४ ॥

दंतुरायाः मुरभिद्वक्षःपीठस्य दृश्यमानवद्वक्षसः परिष्कारलोचितः अलंकाराहः कौस्तुभः कुलगिरितुलारोहे कुलगिरिधरारोहणे
कियानिव भवेत् इव शब्दो वाक्यालंकारे न कियानपि कुलगिरिगुरुतापेक्षया कौस्तुभगुरुत्वं कियत्स्यात् न किमपि तथा कौस्तुभ
स्यातिशयो न कुलगिरेरतिशयः कुलगिरिस्थानीयमतान्तरग्रन्थाः कौस्तुभस्थानीयो रामानुजमुनिग्रन्थ इति भावः कौस्तुभस्य स्वते
जसा सकलभूषणतेजोन्यक्कारेण वीरकिरणप्रच्छादनेन जाज्वल्यमानत्वमभिप्रेत्य विकटेत्युक्तं ४३ नन्वेवमपीतरेषां
नास्मन्मते विश्वास इत्यत आह स्थविरेति कुमतिभणितिभिः कुदृष्टिपरिकल्पितग्रन्थैः यः क्षोभः मनःकालुष्यं तेन क्षीवाः

मताविशेषग्रहणसमर्थाः इत्यर्थः स्थविरनिगमस्तोमस्थानादिसिद्धवेदसमूहस्य स्थैर्यं परस्परविरोधं परिहृत्यार्थनिर्णयं
कुर्वतीस्थैर्याविवादपदनिर्लुंठनात् एतेन परमते श्रुतीनां परस्परविरोधशंतिः सूचिता यतीश्वरपक्षे तु यतीश्वरसिद्धान्तरीतिं क्षि
पन्तु तिरस्कुर्वन्तु भजन्तु स्वीकुर्वन्तु वा न तदीयस्वीकारतिरस्काराभ्यां नोत्कर्षापकर्षाविति भावः अत्र दृष्टान्तमाह लवणवणिज
इति लवणविक्रेतारः रसपरिमलयोः श्लाघाघोषेण वंशस्ताशशाटुंवरेण स्फुटत्वविदलत्पुटभेदनपद्मानि यस्मिन् तत्तथो
क्तं कर्पूराघं कर्पूरमूल्यं किमित्यभिमन्यन्ते किमिति मन्यन्ते किमपि न जानन्तीत्यर्थः न तेन कर्पूरस्य न्यूनता किन्तु लव
णविक्रयणमेव न्यूनतेति भावः पुटभेदनं मूल्ये पूजाविधाव र्घ इति चामरः पूर्वश्लोके त्र दृष्टान्तालंकारः चद्वि
वप्रतिबिंबवत् दृष्टान्तस्तदलंकृतिर्निलक्षणात् ४४ ॥ ॥ यतीश्वरपदारविंदसंश्रिता एव कामप्रसंगरहिता नान्य

वहति महिलामाद्यो वेधास्त्रयीमुखरैः स्तवैर्वहति तनुना यामो भागः शिवस्य विवर्तितैर्नद
पि परमं तत्त्वं गोपीजनस्य वशंवदं मदनकदनैर्नेक्लिश्यन्ते यतीश्वरसंश्रयाः ४५ ॥ ॥ इति वक्तुं ब्रह्मवि

ष्णुशिवानामपि तत्प्रसंगमाह वहतीति आद्यो वेधाः सर्वस्रष्टा ब्रह्मा त्रयीमुखवैः स्वैर्विद्याशब्द्यमानैर्मुखैः स्वतनुभिरिति शे
षः महिलां वनितां सरस्वतीमिति यावत् वहति धत्ते वेदाध्ययनसमयेपि स्त्रीसान्निध्यं न जहातीति भावः सरस्वत्याः वि राम
द्याधिदेवतात्वाद् अभेदाध्यवसायेन मुखैर्वहतीत्यशयोक्तिः शिवस्य वामो भागो वरतनुतया स्त्रीरूपतया वर्तते परिणमति १६
सर्वदा तज्ञावनादर्द्धशरीरे स्त्रीरूपं शाश्वमिति भावः न तु ब्रह्मादिजनकत्वेन प्रसिद्धं परमं तत्त्वं परब्रह्म गोपीजनस्य वशंवदं

वि० २

निगमपथिकेति यतिपरिवृढं यतीनां प्रभुः प्रभौ परिवृढ इति निपातनात्साधुः निगमा वेदा एव पथिकास्तेषां छायाशाली छा-
याप्रधानवृक्षः सकलवेदविस्तारनिम्नभूमिरित्यर्थः निराशानां वीतरागाणां महानिधिः महानिक्षेपः अपेक्षितवैराग्यप्रति-
पादनेनानंदयितेति यावत् महितानां ब्रह्मविदग्रेसरत्वेन पूज्यानां विविधानां शक्ताशक्तादिभेदेन बहुविधानां छात्राणां
शिष्याणां श्रेण्याः समूहस्य तेषां मनोरथा एव रथा इति विशिष्टरूपकं तेषां सारथिः यथाधिकाराभिलाषप्रापणसमर्थ इत्य-
र्थः त्रिभुवनतमसां त्रिलोकाज्ञानानामबाधकाराणां प्रत्यूषः प्रातःकालः प्रत्यूषो हर्मुखं कल्यमित्यमरः त्रिविधा विद्या ये-

निगमपथिकच्छायाशाली निराशमहानिधिर्महितविविधच्छात्रश्रेणीमनोरथसारथिः त्रि-
भुवनतमःप्रत्यूषो यस्त्रिविद्यशिखामणिर्यतिपरिवृढो रक्षायन्त्रं रमापतिसंपदां ९६॥

षां ते त्रिविद्यास्त्रयीसंपन्नास्तेषां शिखामणिः शिरोभूषणं वैदिकपरिष्कारक इत्यर्थः तिस्रो विद्या अधीयत इति विग्रहे तु वि-
द्यालक्षणकल्यान्ताच्चेति वक्तव्यमिति प्राप्तस्य ठकोऽग्रहणान्न त्रिवर्गविद्यानाने निवक्तव्यमिति निषेधेपि औत्सर्गिकाण्प्रसंगाद्
मापतिसंपदां भगवद्विभूतीनां रक्षायन्त्रं रक्षणार्थं यन्त्रमवैमित्यन्यादिकु दृष्टिपिशाचपीडानिवर्तक इत्यर्थः एवंभूतः स-
न्वर्तत इति शेषः इति क्रियाध्याहारो न दोष इत्याह वामनः गार्थं प्रयुज्यते यतिक्षमाभृत्पारावरिमविषये यामिति च-
तुर्थपादस्य पाठान्तरं पारावरिं परावरतत्वस्थितिं विपर्ययान्नविपर्ययं ना प्रयुज्यते इत्यकृष्टपुनि पराणि च अवराणि च परा-
वराणि तेषां भावः पारावर्यं ष्यञ् स्त्रीत्वविवक्षायां ङीष् गुरोर्ही षाणमावरण छत्रशालि मसस्यार्थे छत्रादिभ्यो ण इति णप्र

यति॰ त्पयेच्छात्रशब्दः अस्मिन्पक्षे परंपरितकेवलरूपकालंकारयोः संसृष्टिः ४६ ॥ ॥ पुनस्तत्तत्सूक्तिसारस्यस्मरणजनितकौतूहलेनावि
टी॰ तृप्तस्तया पुनस्ता एव प्रशंसति जडमतीति यतीश्वरसूक्तयः कीदृश्यः जडमतीनां मंदबुद्धीनां मुधा निष्फलं यद्दंतादंति दंतैर्दंतैश्च
१२ प्रहृत्य प्रवृत्तं युद्धं परस्परमनर्थकं कलहमेव वनग्या तेनाध्यवसीयते न व्यपायाद्दुःखं तस्यौषधिसिद्धयः औषधिविकाराः सिद्धयः (
17 शीघ्रमेव तन्निवर्तिका इत्यर्थः प्रमितिनां प्रमाणानां निधयः निक्षेपभूताः प्रमाणजटिला इत्यर्थः प्रमीयंते आभिरिति प्र(
मितयः अकर्तरि च कारक इत्यधिकारात्करणे क्तिन् प्रज्ञाः शास्त्रकाव्यगोचरबुध एव शालयः कमलसस्यानि तेषां प्र

जडमतिमुधादंतादंतिव्यथौषधिसिद्धयः प्रमितिनिधयः प्रज्ञाशालिप्रपालनपष्टयः अ
निमिसुरभयः श्रद्धानंदाभिवर्षुकवारिदाः यमगतिकथाविच्छेदिन्यो यतीश्वरसूक्तयः ४७

पालनपष्टयः लुठकं कौतस्कुतनपसृत्सारणार्थदंडाः अक्तिभिः सुरभयः प्रकाशमानाः श्रद्धानंदानामभिवर्षुकवारिदाः
वर्षशीलमेघाः यमगतिकथां विशेषेण छिंदंतीति तथोक्ताः सुप्यजातौ णिनिस्ताच्छील्ये इति णिनिप्रत्ययः वंतेन इति शेषः
दंतैश्च दंतैश्च प्रहृत्येदं युद्धं प्रवृत्तमिति समर्थेन त्रतेनेदमिति सरूपे इति बहुव्रीहिः अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घः इ राम
च कर्मव्यतिहारे इति समासांतश्च प्रत्ययः एवमग्रे शास्त्रासंत्रिशब्दोपि व्याख्येयः दंतादंतिव्यथेत्यतिशयोक्तिः औष(१२
धिसिद्धय इति रूपकं तयोरंगांगिभावसंकरः अन्यत्र रूपकसंसृष्टिः ४७ ॥ श्रीराम ॥ ॥

प्रतिकलमिहेति अकलुषं कुमुक्तिभिरनुपहतं तत्परज्ञानं परमात्मज्ञानं तस्मिन्नौन्मुक्यं कदाकदात्मभ्येतेत्यौत्सुक्यं तत्तदस्त्व
धातुरस्य स्त्युत्योऽतिस्य रुद्दशैव परज्ञानोन्मुक्याक्षुधातुरुद्दुर्दशा तस्याः परिणतानि परिपक्कानि फलानि यस्य सः परिणत
फलः स चासौ प्रत्यासीदन्निति सन्निकृष्टो भवन् यः फलग्रहिर्वृक्षः स इव सुग्रहाः सुलभाः यतिपरिवृढग्रंथ्याः स्तु
धानस्य सन्निहितस्य फलस्य लाभवत्तत्त्वज्ञानलाभः तिन्नस्य यतिपरिवृढग्रंथ्या अपि सन्निहिता नः संततं तत्त्वज्ञानसंपाद
नेन तदानीं निरुत्थानं दधतीत्यर्थः नः अस्माकं प्रतिकलं प्रतिक्षणं प्रत्यक्षतावलोकनस्य स्वप्रकाशभूतात्मसाक्षात्का

प्रतिकलमिह प्रत्यक्षतावलोकनदीपिकां यतिपरिवृढग्रंथ्याश्लिष्टां निरंतरयंति नः अकलुषपर
ज्ञानोन्मुक्याक्षुधातुरदुर्दशापरिणतफलप्रत्यासीदत्फलेग्रहि सुग्रहाः ४८ मुकुंदाद्रिश्र
ज्ञाकुमुदवनचंद्रातपनिभा स्तुमुक्षामक्षोभ्याद्दंति मुनिवृंदारकगिरः स्मसिद्धांतध्वांतस्थिरकु
तुकदुर्वादिपरिषद्हिताभीतप्रेक्षादिनकरसमुत्थानपहषाः ४९ ॥ रस्यदीपिकां दीपभूतां चिंतां भावनां

निरंतरयंतीति अविच्छेदयंति संतन्यमानां कुर्वंतीत्यर्थः फलानि गृह्णातीति फलेग्रहिः फलेग्रहिरात्मंभरिश्चेति इन्प्रत्ययः ए
वं पदस्यैवं तत्वं च निपात्यते स्यादवंध्यः फलेग्रहिरित्यमरः सुखेन ग्रहीतुं शक्याः सुग्रहाः ईषद्दुःसुषु कृच्छ्रार्थेषु खलु इति खलु प्र
त्ययः परज्ञानोन्मुक्याक्षुधातुरदुर्दशोपयोगप्रमाततावलोकनदीपिकामिति रूपकं तत्रयोः संसृष्टिः ४८ मुकुंदेति मुकुंद
घ्राभंगवत्पादारविंदयोः श्रद्धाआस्तिक्यबुद्धिः कुमुदवनमिव तस्य चंद्रातपनिभाः चंद्रिकासदृशाः मुकुंदचरणारविंद

यति· टी· ४८

18

भक्तिविवेकाशिकाइत्यर्थः स्वसिद्धान्ताः ध्वान्तानि तिमिराली वनेषु स्थिरं कुतुकं अभिलाषाय त्वासां स्थिरकुतुकासां दुर्वादिपरि
षत्‌दुर्वादिसमूहः दिवाभीताइव दुर्वादिपरिषद् दिवाभीताः तेषां प्रेक्षायां बुद्धेः दिवाभीतपक्षेदृष्टेरित्यर्थः दिनकरसमुत्थान
वत्सूर्योदयवत्‌ परुषाः दुःसहाः यतेनयतीश्वरस्य जनीनां कुदृष्टीनां प्रतिकूलत्वं परसिद्धान्तनिःशेषनिवर्तकत्वं च तस्य चितन्तु
निवृन्दारकस्य यतिराजस्य गिरः स्तुत्याः अशेषाभ्यां अप्रकम्प्या मुमुक्षां मोक्षेच्छा इदं नितिविनतं रंतिमुनिश्रेष्ठः सोवृन्दारकश्चमुनिवृन्दा
रकः वृन्दारकनागकुञ्जरैः पूज्यमानमिति समासः वृन्दारकशब्दः श्रेष्ठवाची उपमाद्युपसङ्ख्येष्टिः ४९ ॥ ॥ निराबाधेति

निराबाधा बोधायनभणितिनिस्यन्दसुभगाविशुद्धोपन्यासव्यतिभिदुरशारीरकनया अकुण्ठैकल्ये ते
यतिपतिनिबन्धा निजमुखैरनिद्राणप्रज्ञारसधमनिवेधाय सुधियाम् ५० ॥ ॥

निराबाधाः प्रमाणबाधारहिताः बोधायनभणितीनां वार्त्तिकानां निस्यन्देन प्रवाहेन सुभगाः मनोहराः वार्तिकसंवाद युक्ता इत्यर्थः
परेषां तु वार्त्तिकविरोध इति भावः विशुद्धोपन्यासव्यतिभिदुराः सरलोपन्यासग्रथिताः शारीरकनयाः ब्रह्ममीमांसान्यायाः येषु
ते नयोक्ताः यतिपतेर्निबन्धाः ग्रन्थाः सुधियां विदुषाम् अकुण्ठेरप्रमाणपेशंकारहितैः ननिभीतकुतपासकोचरहितैर्निजमुखैः
पाठ्यमाना इति शेषः अनिद्राणस्य जागरूकस्य प्रज्ञारसस्य धमनिवेधाय नाडीभेदनायकल्प्यन्ते समर्था भवन्ति यथा नाडीभे
दनेरसः प्रस्रवति एवं प्रज्ञाप्रवाहयन्तीति भावः प्रज्ञायाधमन्यासंबन्धेपि संबन्धोक्तेरतिशयोक्तिः विदि भिदि छिदेः कुरच्

एम ४८

रकारादीनि नामानि रामाद्युक्तस्यावर्णरत्नानि च वर्णाश्चैव संज्ञा संजनयन्ति मद्भतिन्यायेन यतिनृपतिशब्द अवर्णमात्रेणैव परत्वा-
दिकोलाहलः शाम्यतीत्याह विकल्पेति विकल्पाटोपेन विकल्पाडम्बरेण अशेषं समस्तं क्रान्तिपथं वेदमार्गं विघटयन्न हृष्यन् यत्र ल-
क्षणेशानुप्रत्ययः वितण्डा स्वपक्षस्थापनरहितपरपक्षदूषणैकफला या कथा तया अहंकुर्वतोः हुंकारिणः प्रतिकथकोः प्रतिवि-
दितवेतंडागजाक्षेपाप्लतनायाः सेनायाः समूहस्समर्थः विधानव्यापारेऽधृतव्यापारः नेत्ररक्तीकरणदन्तघटनहस्तास्फा-
लनचपेटिकाप्रदानाहंकारास्तान्यस्त्राघनदुर्भाषणऊर्युक्तिकल्पनादिव्यापार एव व्यतिभिदुरसंरंभकलहः परस्परहननार्थं क्रो-

विकल्पाटोपेन क्रान्तिपथमशेषं विघटयन्नुपहृच्छानिर्दिष्टे यतिनृपतिशब्दे विरमति वितण्डाहंकुर्वत्प्र-
तिकथकवेतण्डघटनाविधानव्यापारव्यतिभिदुरसंरंभकलहः ५१ प्रतिष्ठानकाण्डं प्रतिपदमृचां धा-
म यजुषां परिष्कारः साम्नां परिणमथर्वाङ्गिरसयोः प्रदीपस्तन्त्राणां प्रतिकृतिरसोनापसगिरां प्रस-
न्निः संवित्तेः प्रदिशतु यतीशानभणितिः ५२ ॥ यथपूर्वेकरणः यतिनृपतिशब्दे यदृच्छानिर्दिष्टे सति येन केनापि स्वेच्छया

नाम्नि समये उच्यमाने सति विरमति निवर्तते ५१ प्रतिष्ठेति यतीशानभणितिः कीदृशी तर्काणां प्रमाणानुग्राहकसतर्काणां प्रति-
ष्ठा व्यवस्थापनेन तर्काः प्रतिष्ठानादिकं तर्काणां स्वेवा प्रतिष्ठानाम्यां न्यायमितिभावः प्रतिष्ठन्त्यत्रेति प्रतिष्ठा अत प्रोपसर्गे इत्यधिकरणे
ल्यणप्रत्ययः ऋचां प्रतिपदं पदं पदं प्रतिपदं प्रतिशब्दस्वरूपं यथा पदं प्रतिप्रतिपदे पव्याय शब्द रूपतत्व्याख्यानभूतेत्यर्थः य-
जुषां धामस्थानं साम्नां परिष्कारः भूषणं अथर्वाङ्गिरसयोः अथर्वणऋग्यजुषोः परिणाममूलधनेन तदुपचयहेतुरित्यर्थः

तत्त्वानां प्रदीपः प्रकाशकः तापसर्गिणां अभिषेकानां अस्मिन् त्युरणानां प्रतिकृतिः प्रतिनिधिः असौ सर्वं प्रत्यक्षसिद्धा यतीशानभक्ति-
तिः यतिराजश्रीसूक्तिः सविक्तिः सम्यक् ज्ञानस्य प्रशस्तिं प्रसन्नानां प्रदिशतु ददातु ५२ ॥ ॥ हितावद्ध इति शुनासीरः इन्द्रः स्कन्दः कु-
मारः द्रुहिणः स्वयंभुः हरः शिवः हेरंबः गजाननः कृतभुग् अग्निः प्रभेशः सूर्यः आदिर्येषां तेन तपोज्ञानिष्ठे नैतेस्तु द्राः भगवद्रूपेक्ष-
यात् निकृष्टदेवताः तेषां प्रणतेन नमस्कारस्य परिहारे परित्यागे प्रतिभुवः लग्नकाः यथा ऋणप्रत्यर्पणे यत्ऋणप्रदातुः अविश्वसनीय
तेन विश्वसनीयः कश्चिद्दंपददातीति ऋणप्रदाता दर्शितो ऋणनिवर्तकस्यावश्यं निर्वाहको भवति तथा प्रणतिपरिहारस्यावश्यं

हितावद्धेऽहृद्ये हरिचरणपङ्केरुहयुगे निबद्धं स्यैकान्तं किमपि यतिभूमृद्गणितयः शुनासीरस्कन्दद्रुहिणहर

हेरम्बकृतभुक्प्रभेशादिक्षुद्रप्रणतिपरिहारप्रतिभुवः ५३ यथाभूतस्तासां यतिनृपतिसूक्तिर्विजयते

सुधासंदोहात्मा सुचरितविपक्तिः श्रुतिमतां कथादप्यन्तौतस्तुनकलहकोलाहलहतत्रिवेदीनि

र्वेदप्रशमनविनोदप्रणयिनी ५४ ॥ निर्वाहको भवति देवतान्तरनमस्कारमवश्यं वर्जयन्तीत्यर्थः यतिभूमृद्गणितयो

यतिराजस्य उक्तयो हतानि निरस्तानि अवद्यानि येन तस्मिन् हरिचरणपङ्केरुहयुगे भगवत्पादारविन्दद्वंद्वे किमपि सर्वोत्तममनूपादेकमे-
कान्तनियतं नियतमत्यन्तं निबध्नन्ति संपादयन्ति देवतान्तरसंबन्धं परिहृत्य भगवदेकान्त्यं संपादयन्तीत्यर्थः ५३ यथाभूतेति भूतसत्य-
मनतिक्रान्तो यथाभूतं सूक्तेक्षादाकृते भूतमित्यमरः पदार्थानतिवृत्ताव्ययीभावः यथाभूतमर्थीयसासामनयोक्तास्तस्या यथार्थप्रति-
पादिनीति यावत् सुधासंदोहात्मा अमृतप्रवाहरूपा तद्वदास्वादनीयेत्यर्थः श्रुतिमतां श्रोत्रवतां सुचरितविपक्तिः पुण्यपरि-
णामः पचेक्तिन् प्रत्ययः श्रोत्रानन्दकारिणीत्यर्थः कथासु वादगोष्ठीषु दृप्यतां गर्वितानां कौतस्कुतानां हेतुकानां कलहकोला-
हलेन वादकलकलेन हता याः दूषिता याः त्रिवेद्याः त्रय्या नि-
र्वेदस्य समेनोद्वेगस्य प्रशमनविनोदशान्तिनयनक्रीडायां प्र-
णयिनी प्रीतिमती ऊर्युक्तिः दूषितश्रुतीनां समरसत्वसंपा-
दिनीत्यर्थः यतिनृपतिसूक्तिर्विजयते सर्वोत्कर्षेण वर्तते ५४ ॥

स्तु॰ टी॰ ५८ 19

स्तु ५८

ये हि लक्ष्मणमते दोषानारोपयंति ते स्वपक्षदोषानेव प्रकाशयंतीत्याह आनिश्रेणीति आनिश्रेणीनां वेदसमूहानां चूडापदैः
शिरोभिः वक्रमते वक्रमानेनाापिते सकलोपनिषदनुगृहीते श्रीमद्यथः लक्ष्मणमते यः विनयमतिः व्यर्थबुद्धिः अवद्यदोषानलगंतीति
ज्ञानाभावादाश्रयं बुद्धित्वं स्वपक्षस्यानन्दमतस्यान्दोषानारोपयति कल्पयति स जडः निजगात्रेषु शरीरावयवेषु मूर्द्धादिषु गलद्भि
र्निपतद्भिर्जंबालैः कर्दमैः गगनतलमाकाशं लिंपति दिग्धं यथा कर्दमेनाकाशलेपने कर्दमः स्वमुख एव पतति नाकाशे लगति न
यातिर्दुष्टलक्ष्मणमते दोषानुद्भावयन् स्वमतस्यैव दोषानुद्भावयतीति भावः अत्र वाक्यार्थयोः सदृशयोरैक्यान्निद

आनिश्रेणीचूडापदवक्रमते लक्ष्मणमते स्वपक्षस्यानन्दोषान्वितन्वमतिरारोपयति यः स्वहस्तेनोत्ता-
नैः सखेलं तु निजगात्रेषु वक्रकलंकं गलद्भिर्जंबालैर्गगनतलमालिंपति जडः ५५ निरालोके लोके नि-
रवधिपरिस्नेहभरितो यतिक्ष्माभृद्दीपो यदि न खलु जाज्वल्यत इह स्त्रहंकारध्वान्तविजहतु कथंकारमनघाः
कुतर्कव्यालौघकुमतिमतपातालकुहरे ५६ ॥

र्शनेत्युक्तं निदर्शनालंकारः तेन केवलं परमते दोषालग्नमेव प्रत्युत स्वमतस्य दोषोद्भावनं जातमिति विषमालंकारोऽध्वन्यते अ-
निष्टस्यापि अवाप्तिस्तदिष्टापसमुद्यमादिति लक्षणात् ५५ इह जगति रामानुजार्यस्य दीपप्रकाशनात् कुमतिमतांधकारण
तैर्ज्ञानवंतो न निपतंतीत्यमुमर्थं व्यतिरेकमुखेनाह निरालोक इति निर्गत आलोकः सम्यक्ज्ञानमेव प्रकाशो यस्मिन् तस्मिन्नि
रालोके अज्ञानान्धकाराच्छन्ने अस्मिन् लोके निरवधिना निर्हेतुकेन परस्नेहेन परमकृपानुरागेण भरितः पूर्णः
यतिक्ष्माभृद्दीपः न जाज्वल्यते भृशं न प्रकाशयते यदि किलेति संभावनायां वार्तासंभाव्ययोः किलेत्यमरः एवं संभाव्य

यति· टी· २०

२०

तेचेदित्यर्थः अनघाः समीचीनदर्शनप्रतिबंधकदोषरहिताः कृतकाएवव्यालोघानुष्टुसर्पसमूहा यस्मिंस्तत्तन्कृमतिमतमेवपा-
तालकुहरंपातालगुहायस्मिंस्तत्तत् अहंकारध्वांतकूपःकारंविज्ञहेतुकमपिनजह्युरित्यर्थः रामानुजदीपाभावेविशेषाग्र-
हणात्स्वमतेपतेयुरितिभावः कथंकारमित्यत्रअन्यदेवकथमित्यस्तुसिद्धौप्रयोगश्चदितिकृत्वणमुलुप्रत्ययः सिद्धौप्रयोग-
श्चतत्प्रयोगेप्यर्थनिषेधाभावेनतदप्रयोगसिद्धश्चेदित्यर्थः ५६ ॥ ॥ यतीश्वरमतंनवीनमितिपाहुर्येयतितेप्रत्याह यति-
क्ष्माभृदिति इहअस्मिंल्लोकेदेवादिलोकेपूर्वमेवसृष्टिमितिभावः यतिक्ष्माभृद्दृष्टंयतिराजेनज्ञातंहृदंमतंनवीनंनूतनमिति-
अभ्युपगम्यतदतिशेषः तदपिनपापिनूतनंचेद्गुणनिकषतारत्नम्यपरीक्षणौत्कंकिमापातंनावतानापकृष्टत्वप्रसंगस्तुनत्त्वं-

यतिक्ष्माभृद्दृष्टंमतमितिनवीनंतदपिकिंततःप्रागेवास्यहृदंतदपिकिंवर्णनिकषे निशाम्यंतोयद्वा
निजमततिरस्कारविगमान्निरातंकाष्टंकद्रविडगुहदेवप्रभृतयः ५७ ॥

एवमग्रेपुटपाकतत्त्वनिकषोपलेविलिख्यमानेसदुत्कृष्टज्ञायतेनतदृक्तमप्यकृमाणेनकोप्यपविचारितेसत्यस्यनूतनमेवोत्कृष्टज्ञा-
यतेइत्यर्थः प्रामाण्याप्रामाण्ययोर्विषयेपूर्वज्ञानपश्चात्ज्ञानेअकिंचित्करेकिंतुप्रमाणबाधाभावादेवेतिभावः अतएवान्य-
स्कृतवादिमतंततः प्रागेवरामानुजदृष्टमतान्पूर्वमेवविद्यतेचेतिशेषः तदपिपूर्वंचेदपिकिंनतावतोत्कृष्टमित्यर्थः परमत-
स्यापिरामानुजदृष्टमतानपेक्षयाकतिपयशिष्यसैः पूर्वभावित्वेनतत्तनादिसिद्धत्वमितिततः प्रागित्युक्तेएवमभ्युपगमवादेनपू-
र्विहारस्तुतत्त्वावस्तुतः प्राक्सिद्धत्वमस्येवेतिवास्तवपक्षमाह निशाम्यंतोमितिति यद्वेतिपक्षांतरेनिजमतानांतिरस्कारवि-
गमात्तत्त्वादराभावान्निरातंकानिर्भयाष्टंकद्रविडगुहदेवप्रभृतयः प्राचीनभाष्यकारानिशाम्यंताविचार्यंतोप्राची

राम २०

सुधासारमिति अयं चित्रन्यायनिभवन्निगमगरिमा वेदसंबंधिगुरुत्वं यासां ता निगमगिरो वाचः वेदवचनतुल्याः इत्यर्थः श्रीमद्यतिवरभु
वः दर्शनोद्धारकत्वेन सर्वपादिशिष्टयतिराजानुस्मितमाः भणितयः सूक्तयः श्रोत्रकुहरे कर्णविवरे सुधासारं अमृतधारासंपातं निषिंचंतीति
धारासंपातं आसारं इत्यमरः यस्यां मनसा रस्यास्वादस्यानुभवस्याभ्यासप्रचयमहिम्ना अभ्यासातिशयस्य सामर्थ्येनोल्लासितधियां
विकसितबुद्धीनां सुमनसां विदुषां काले मोक्षकाले सदा संततं अनंतमपरिच्छिन्नं तत् वेदान्तप्रसिद्धं परंब्रह्म आस्वाद्यं आस्वाद
नीयं भवति रामानुजसूक्तानां मननपरिश्रमशालिनां परिपूर्णब्रह्मानन्दानुभवलक्षणमोक्षः सुलभ इति भावः वर्षंसनिदुर्भि

सुधासारं श्रीमद्यतिवरभुवः श्रोत्रकुहरे निषिंचंत्यं तां चित्रं निगमगरिमाणो भणितयः यदास्वादाभ्यासप्र
चयमहिमोल्लासितधियां सदास्वाद्यं काले तदमनन्तमनन्ते सुमनसां ५८ यतिक्षोणीभर्तुर्यदिदमनिदं
भोगजनिता शिरःश्रेणीजुष्टं तदिह हृदि बंधं प्रभवति अविद्यारण्यानां कुहरविहरन्मामकमनःप्रमा
द्यन्मातंगप्रथमनिगलं पादयुगलं ५९ ॥

क्षं न भवति तद्धृदि निगम्यते ५८ यतीति अनिदंभोगाः अनादिसंसारानुभवायाजननायाः जनसमूहस्य शिरःश्रेणीभिः शिरःपंक्ति
भिः जुष्टं सेवितं यतिक्षोणीभर्तुर्यतिराजस्य यद्गुरुः सेव्यमानं यत्पादयुगलं तत् पादयुगलं इह अस्मिन् लोके स्थिरः बंधः प्रेमस्नेहत्व
लावल्यं चव यतेः ने नेति वंधानि वाक्‌लकः करणं घनं यस्मिन् तत्तथोक्तं अविद्या अज्ञानमेवारण्यानी महारण्यं महारण्यमरण्या
नीत्यमरः तस्याः कुहरे गर्भे विहरन्मामकं मदीयं मन एव माद्यन् प्रकर्षेण मत्तो भवन्मातंगो गजः तस्य प्रथमनिगलं प्रथमबंधनाय
प्र८ शृंखलं सत् भवति नियमनसमर्थं भवति यथा महारण्ये यथेच्छं संचरतो मदोगजस्य दृढबंधशृंखलं तन्नियमने समर्थं भवति एव

मत्तोन्ततु यावन्मदीयमनस्सत्त्ववत्पापध्वस्तिर्न स्यात्तावच्छ्रीमद्रामानुजमुनिपादारविंदयुगलं निपतत्विति भावः अयं भोगो हृदा
नीतन भोगो यस्मात्सा इदं भोगा सा न भवतीत्यनिदंभोगा अन्नादिभोगेष्वर्थ जनानां समूहो जनता ग्रामजनबंधुभ्यस्तलिति जनशब्दात्
तलप्रत्ययः अनिदंभोगा च सा जनता चेति विग्रहः ५९ ॥ ॥ सावित्रीति विमुक्तानां मुक्तपुरुषाणां मोक्षिकानां च सावित्री उत्पादिकास

सवित्री मुक्तानां सकलजगदेनः प्रशमनी गरीयोभिस्तीर्थैरुपचिततरसायामुनमुखैः ।
निरुद्धे दानिम्नेतरमपि समाह्लावयति मां यदृच्छाविक्षेपाद्यतिपतिदयादिव्यतटिनी ६०

कलजगतामेनः प्रशमनी पापनिवर्तिका गरीयोभिः पूज्यैरधिकैर्वा यामुनमुखैर्यमुनाचार्यप्रभृतिभिर्यमुनासंबंधिप्रभृतिभिश्च
तीर्थैराचार्यैः पुण्यपादकैश्चापचितेतोवर्द्धितः रसो रागो जलं च यस्याः सा निरुद्धे दाक्षपरहिता यतिपतिदयैव दिव्यतटिनी गंगा नि
म्नेतरं उन्नतं अहंकारिणमपीत्यर्थः मां यदृच्छाविक्षेपात् स्वेच्छाप्रसरणात्समाह्लावयति सम्यक् क्लिन्नं करोति गंगाप्रवाहोपि यमुना राम
दिभिः संगतोतिप्रवृद्धः समुन्नतमपि भूमिमपि व्याप्नोतीति तद्वदिति भावः ६० ॥ श्रीरामायनमः ॥ ॥ २१

चिंतेति चिंतापदार्थविचारएवशेषोयेषांतानितथोक्तानि नहिचारसाध्यःकोपिलाभोनास्तीतिभावः ननुपदार्थनिष्ठोपिफ-
लमित्यतआह दुरर्थेति दुरर्थैश्चित्तक्षोभकारिभिरर्थैर्दंतुराणि पूर्णानि श्रमंविनान्यफलंनास्तीतिभावः वचांसिवक्तृपात्रतासा
शैत्येग्रथिलाग्रेपिमुक्ताःविषमाइतियावत् ग्रथिलाइत्यनेनजीर्णकंथासाम्यंगम्यते तथाचनसिद्धांतानामतिशीलत्वमिति
भावः सिद्धांताःयतिवरग्रंथानुसंधायिनिश्रीभाष्यादिग्रंथानामनुसंधातरितसमिंधतेनप्रकाशंतेनरोचंतइतियावत् अत्रदृष्टां-
तमाह मुक्तेति मुक्ताशुक्तिवद्विशुद्धयासिद्धतटिन्यागंगयाचूडालशिखायुक्ताचूडापदंशिरोपलक्षणंयस्यसतथोक्तः खंडपरशुरीश्वरः

चिंताशेषदुरर्थदंतुरवचःकंथाशतग्रंथिलाः सिद्धांतानसमिंधतेयतिपतिग्रंथानुसंधातरि मुक्ताशु-
क्तिविशुद्धसिद्धतटिनीचूडालचूडापदः किंकुल्याकलयेतखंडपरशुर्मंडूकमंजूषिकां ९१ वंदेत-
पमितानाधुरंधरमहंमानांधकारद्रुहापथ्यानेपरिपंथिनांनिजदृशांकृध्यानमिधानया दत्तेयेनदयानु-
धातुनिधिनापीताविशुद्धपयःकालेनःकरिशैलकूलजलदःकोपिधिकंवर्षति ९२ ॥ मंडूकानांमंजूषिकांपेटि-

कांएकाश्रयमितियावत् कुल्यांअल्पकृत्रिमसरितं कलयेतधरेत् किंनहीतिभावः कुल्याल्पाकृत्रिमासरिदित्यमरः चूडाश-
ब्दात्प्राण्यंगात्सिध्मादिलजन्यतरस्यामितिलच् हृष्टांतालंकारः ९१ वंदइति इध्यानयाप्रकाशमानयामानएवांधकारस्तस्मैद्रुह्यतीति
तिमानांधकारध्रुट्सत्सुहिंषत्सादिनाक्विप्तनयानिजेदृशासकटाक्षेणपरिपंथिनांविरोधिनांपथ्यानेमार्गेनिरुंधानवंतंयत-
तेनतथाविधप्रसिद्धेयामिनांधुरंधरंयतिनिर्वाहकंवंदेदयासुधातुनिधिनायेनयतिधुर्येणदत्तंविशुद्धंआनतिपरिशुद्धपयःउ

यति-
टी-
२२

दकं करिशैले हस्तिगिरौ कृष्णएव कृष्णजलदो नीलमेघः पीतानः अस्माकं दासानां काले भाग्यानुरूपसमये वर्षाकाले च कांक्षा
धिकं कांक्षितादप्यधिकं वर्षति यद्दत्तपयः प्रीतो भगवानस्माकं नदीयत्वाभिमानेनाऽखिलेष्टान्मुक्तिपर्यन्तानुत्तहर्षायानु
ददातीति तं वन्दे इति भावः श्रीकाञ्चीपूर्णमुनेरादेशाद्भगवद्भिर्भाष्यकारैर्वरदराजाय पानीयकैंकर्यं कृतमिति सम्प्रदायः तदभिसं
धाय दत्तं येनेत्याद्युक्तं लोके कृष्णमेघोऽल्पवर्णाम्बुधौ लवणोदकं पीत्वा परिमितं वर्षति अयं करिशैलकृष्णजलदः सुधाम्बुधेर्वि
शुद्धाम्बुदकं पीत्वा अपरिमितं वर्षतीति ततो व्यतिरेकः अत्राप्रस्तुतेन करिगिरिनाथवृत्तान्तेन प्रस्तुतयतिराजप्रशंसालङ्कारः
व्यतिरेकस्तयोः ६२ ॥ ॥ धर्मसम्पादनात्त्रय्यवदपमपि भगवदवतारएवेत्याह काषायेणेति काषायेण रक्तवस्त्रेण काषायेणे

काषायेण गृहीतपीतवसना दण्डैस्त्रिभिर्मण्डिता सा मूर्तिः मुरमर्दनस्य जयति त्र्यन्तेन संरक्षिणी य
त्याख्यायिततीर्थवर्धितधियामभ्यस्यतां यद्गुणान् आसिन्धोरनिदंप्रदेशनियता कीर्तिः प्रजागर्ति नः ६३ ॥

नरक्तं रागादित्यर्णेन गृहीतं तिरोहितं पीतवसनं यतो तावरं यस्याः सा तथोक्ता त्रिभिर्दण्डैर्मण्डिता अलंकृता त्रिदण्डधारिणी त्र्यर्थत्रय्य
न्तसंरक्षिणी वेदान्तसंरक्षिणी सा रामानुजनाम्ना प्रसिद्धा मुरमर्दनस्य भगवतो मूर्तिर्जयति सर्वोत्कर्षेण वर्तते यया मूर्त्या प्रख्या
पिते यतीइमहासिकसंततेन प्रसिद्धं प्रापिते स्तीर्थैरात्रेयरामानुजाचार्यैर्वीरेहसांशुवाहैर्वर्द्धितधियाविस्तारितबुद्धीनां य
द्गुणानुपद्रामानुजमूर्तिगुणानभ्यस्यतां संततं चिन्तयतां नः अस्माकं अयं चासौ प्रदेश इदंप्रदेशः अल्पदेश इत्यर्थः तेनानि
यतापरिच्छिन्ना न भवतीत्यनिदंप्रदेशनियता सती सकलदेशव्यापिनी कीर्तिरासिन्धोः समुद्रपर्यन्तं प्रजागर्ति प्रकाशते यन्महा
नसिकसंततिसंभूताचार्यशिक्षितबुद्धीनां यद्गुणानुचिन्तयतामस्माकमपि कीर्तिरासमुद्रपर्यन्तं प्रकाशते तादृशरामानुजस्य

[illegible] ६३ ॥ ॥

राम
२२

लिप्स इति रथ्यायां श्रीरंगवीथ्यां ये परागा धूलयस्तेषां छटायाः समूहस्य रक्षारोपणेन भालप्रदेशेऽर्पणेन धन्यं पवित्रं सूरिपरिषदः सीमं-
तसीमान्तिकं फालदेशो यस्य तत्तथोक्तं श्रणमेषु सूरिपरिषत् फालदेशस्य रामानुजचरणारविंदसंबंधेन तच्चरणारविंदस्थितरथ्या-
धूलिसंसर्गस्य संसारिसूरिपंचमहाभूतनिबर्हिहेतुताइक्षारोपणेन सुकृतलोकं भूतावेशवतां रक्षार्थं भस्मादिकफालदेशे निक्षिप-
ति तद्वदिति भावः लक्ष्मणयोगिनः पदयुगलं लिप्से लब्धुमिच्छामि त्वद्भूतशांत्यर्थमपि तत्पदयुगलमभिलषामीति भावः तुल
भवशान्ताविति तस्माज्ज्ञानतः कर्मणः समानकर्तृतादिच्छायां वेति सन्निहिते सति सीमन्तादिना इत्यादेशे त्र लोपो भासस्येत्यभ्यास

लिप्से लक्ष्मणयोगिनः पदयुगं रथ्यापरागच्छटारक्षारोपणधन्यसूरिपरिषत्सीमन्तसीमान्तिकं भिक्षाप-
र्यटनक्षणे भुवि भरां चक्रे गलत्किल्बिषा यद्विन्याससमीषेण पद्ममकरीमुद्रासमुद्रा वरा ६४ ॥ ॥

लोपेन तोलडान्मेन पदेऽन्नमपुरुषैकवचने सति लिप्से इति रूपं समुद्रा वरा भूमिः भिक्षापर्यटनक्षणे भुवि भिक्षार्थसंचारसमयेषु य-
द्विन्याससमीषेण यस्य पादयुगलस्य विन्याससमीषेण विक्रमणव्याजेन गलत्किल्बिषा निबर्हपापा यासतीमकरीणां मुद्रां चिह्नं विभरां
चक्रे बभार भिक्षापर्यटनसमयेषु भूमौ पदन्यासेकृतेन भूम्याः पापनिबर्हिः पादतलस्य मकरीरेखाणां पांसुप्रदेशेषु मुद्रणात्मकारि-
कापत्रसंपन्नि प्राप्तेति भावः भूमेरपि पावनतममतेनपरिष्कारतया चतुराहावतारादिवद्रामानुजसुते भगवद्दात्मकत्वव्यञ्जनेति विभ-
रांचक्रे इत्यत्र भीह्रीभृहुवां श्लुवच्चेति लिट्यामप्रत्ययः श्लुवद्भावात् द्वित्वे पात्वो ह्रिभीत्वः शब्दानुप्रयुज्यते लिटीति कृञोऽनुप्र-
योगः ६४ ॥ ॥नानान्तेत्रेति नानान्तेत्रैर्नानाविधवाह्यकुदृष्टिशास्त्रैर्विलोभितेन प्रतारितेन स्वस्वदर्शनीतेनेति यावत्

यति टी २३

23

मनसानिर्लीनादुर्विनीतयोदुष्टन्यापापैस्तैर्यतिपतेरादेशस्यवैदेशिकैर्विदेशादागतैरन्यैरित्यर्थः नतनश्रागनतदित्येठकूपस्य पः कु
त्सितावेदनतात्पर्यविरोधिनीदृष्टिर्विचारणायेषांतैस्तथोक्तैः कलिभिः व्यासः हासपदीकृतः आलोड्यसर्वशास्त्राणिविचार्यचपु
नःपुनः इदमेकंसुनिष्पन्नंध्येयोनारायणःसदा सत्यंसत्यंपुनःसत्यमुद्धृत्यभुजमुच्यते वेदाच्छास्त्रंपरंनास्तिनदैवंकेशवात्पर
मितिवदन्सकलवेदव्यासःनप्रसिद्धव्यासनामधेयोमुनिःपरिहासास्पदीकृतइत्यर्थः प्राचेतसोवाल्मीकिरपिक्लिष्टव्यापारात्परि
हृतः स्वत्रपाणांहिलोकानामादिकर्तास्वयंप्रभुः पद्मोद्भवोर्कसंकाशोनाभ्यामुत्पाद्यमामपि प्राजापत्यंत्वपाकर्मसर्वंमयिनि
वेशितं अधिकंमेनिरेविष्णुंदेवाःसर्षिगणास्तदा इत्यादिकंवदन्स्वयोमिजःप्रकृष्टचेतास्तपोमहिमकाष्ठाधिगततेजस्ताविद
ग्धाविलकल्मषस्स्वतुर्मुखत्वलब्धसार्वज्ञवेरामुनिरमुत्रत्नभावप्रापितइत्यर्थः शुकः जन्मप्रभृत्यस्पृष्टसंसारगंधस्तत्त्तग्राभावेपि

नात्मानंत्रविलोभितेनमनसानिर्लीनदुर्नीतिभिः कष्टंकुत्सितदृष्टिभिर्यतिपतेरादेशवैदेशिकैः ।
व्यासोहासपदीकृतःपरिहृतःप्राचेतसश्चेतसः क्लिष्टःकेलिशुकस्सकसच्चसुधावोधायवोधायनः ८५

काष्ठपाषाणादितुल्यावलोकितनतत्त्वजनःपरीक्षित्प्रभृतिमहाप्राज्ञानांपरमार्थतत्त्वोपदेष्टानांदीमारम्भासमाप्तिभगवत्स्मरतत्व
तिपादनपरःशुकयोगीकेलिशुकःक्रीडार्थंपंजरबद्धःशुकःक्लिष्टःनद्वाक्यान्यपिकेवलश्रवणानंदैकफलानिनार्थपरत्वनिश्चयप
राणीतिप्रतिपादनेनतस्याप्रामाण्यमपिनांगीकृतमितिभावः सर्वेषामापस्तंबादीनांस्मर्तॄणामाचार्यत्वेनप्रसिद्धोबोधायनःभगवद्बोधा
श्रयत्वेनप्रसिद्धबोधायननामधेयोप्रसिद्धत्रवार्तिककारश्रमुधावोधायनिरर्थकबोधायजानइतिशेषः रामानुजमतानभिज्ञै
र्नानात्मवादविलुप्तबुद्धिभिर्वैदिकैस्सुव्यासवाल्मीकिशुकादिवाक्यानांमेककंठ्येनप्रामाण्यंबोधायनवार्तिकानुसारेणसूत्रनास्

अन्यमतानामुपबृंहणादिविरोधेनाप्रामाणिकत्वं च गम्यते ८५ ॥

यं चांगीकृतमिति गम्यते नैनैनन्नन्तस्वकृतत्वाद्पि निर्बाधत्वं.

राम २३

अर्थेति जगतां लोकानां अस्याहितं महाभयं संसारभयं छिनत्तीति तथोक्तं तेन सुप्रज्ञाता विनिर्णीतिः अस्याहितं महाभीतिरियम
रः संयमिनां प्रस्तापयति राजेन अराजन्म जन्मप्रभृति राजन्वती समीचीनराजयुक्ता राजन्वत्सौराज्ये इति निपातनान्नाम् साधुः प्रकृत्यादिभ्य
स्तापसंख्यानमिति यमिनस्य वृत्तौ तीयातेन धान्येन प्रत्नवानिति वद्भेदाधीनतया च यतिराज एव सद्बुधे समीचीनपरिपाकवृत्तिभावः ।
वृद्धेः कुलं नरनिर्णीतं दुर्नयेभ्यो यतीय समीचीन्यायेषु प्रवेशनमेव परिपालनमिति भावः मामिका मदीया असौ श्रीभाष्यादि
ग्रन्थपरिशीलनशालिनी मतिः बुद्धिः रथ्या अर्थादनपेतास्व प्रयोजनातिष्टतिवर्तते अन्यमतविषयमतीनां तु अस्मैक प्रयोजनत
याद्यैवमर्थ्यमेवेति भावः सार्थकामेवस्फुटयति यत्सारस्वतेति यस्य यतिराजस्य सारस्वतमेव दुग्धसागरसुधासैव सिद्धा

अर्थ्यातिष्ठति मामिका मतिरसौ राजन्म राजन्वती यत्यासंयमिनामनेन जगतामस्याहितच्छेदिना ।
यत्सारस्वतदुग्धसागरसुधासिद्धौषधास्वादिनां प्रस्तापायनतोभवीति भगवन्मायामहायामिनी ६६

यं जरामरणराहित्यकारिताम्नदात्स्वादयतीति सिद्धौषधं स्वादिनः तेषां भगवन्मायाविचित्रपरिणामनया आश्चर्यकारिणी प्रकृ
तिरेव महायामिनी महारात्रिः कालरात्रिः प्रस्तापायत्तानसंकोचरूपदीर्घनिद्राकर्तृन भवतीति न प्रभवति क्रियापर्यायपदस्य कर्मणि
स्थानिनः इति चतुर्थी प्रकृतेर्जीवस्य ज्ञानसंकोचकारिताइति निरूपणयति राजश्रीसूक्त्याम्लतपायिनां क्षारसागरसुधापायिनां ।
देवानां महारात्रिः कालरात्रिर्यथामरणं न संपादयति तथा प्रकृतिर्ज्ञानसंकोचं न करोतीत्यर्थः प्रकृतिविमुक्ताभवन्तीति भावः मा
मिके त्वंगणनन्नपाशान्नसृष्टिजः केवलमामकभागधेयेति छन्दोविषयतया नियमितत्वादपि मामकनरकपाद्रूपसंख्यानमितीदं ६६

यति· टी २४ २५

सद्गुरूपदिष्टयतिराजश्रीसूक्तिमंदीयबुद्धिरन्यप्रवृत्तिं परित्यज्य रामानुजसिद्धांतमेवालंबनइत्याह सुह्रेति दुग्धोदन्वदप
त्यस्य क्षीराब्धिकन्यकायाः सन्निधिना सान्निध्येन सदा सामोदस्य नित्यानंदयुक्तस्य दामोदरस्य श्लक्ष्णस्याल्पस्यापि श्लक्ष्णं दभ्रं कृ
शं तन्वित्यमरः यद्वा श्लक्ष्णस्य मसृणस्य चिक्कणं मसृणं स्निग्धमित्यमरः आलोकनस्य कटाक्षस्य दोर्लेलितेन गर्वेण न
त्सामर्थ्येनेति यावत् जनितउन्मेषा विकासो यस्या सा तथोक्ता भगवतीयदयाभरितशीतलकटाक्षलब्धेत्यर्थः अनेन सत्वमय

सुह्रादेशवशंवदीकृतयतिक्षोणीशवाणीशतप्रत्यादिष्टबहिर्गतःश्रुतिशिरःप्रासादमासीदति
दुग्धोदन्वदपत्यसन्निधिसदासामोददामोदरश्लक्ष्णालोकनदोर्लेलित्यजनितोन्मेषामनीषामम ६०

त्वं गम्यते तेनानंदप्रवणत्वं दुग्धोदन्वदपत्यसन्निधीत्यनेन निग्रहसंकल्पस्यानवसरो दर्शितः अतएवोल्लाससंयुक्ततयानुग्रहशील
त्वं च सुह्रादेशेन परिशुद्धोपदेशेन वशंवदीकृतया स्वायत्तीकृतया यतिक्षोणीशवाणीनां यतिराजसूक्तीनां मीशतया ऐश्वर्येण
प्रत्यादिष्टा निरस्ता बहिर्गतिः बाह्यमतप्रवृत्तिर्बहिर्देशगमनं च यया सा तथोक्ता सती श्रुतिशिरः वेदांत एव प्रासादः हर्म्यं तं आ
सीदति प्राप्नोति अत्र मनीषायां सुराज्ञित्वव्यवहारप्रवृत्तेः समासोक्तिः सा च प्रत्यादिष्टबहिर्गतिरिति विशेषणेन श्रुतिशिरःप्रा राम
सादमिति रूपकेण चांगभूतेन संकीर्यते ६० ॥ राम ॥ ॥ २८

आत्मा नामेति यतीन्द्रस्य पद्धतिं सिद्धान्तमार्गं जुषन्ते भजन्त इति यतीन्द्रपद्धतिजुषस्तेषाम् आजन्मशुद्धा जायमानकटाक्षमूलत्वादा
जन्मशुद्धत्वमतिः आगामिपर्याभूहननसमर्था बुद्धिः स्मृतिरतीतविषया मतिरागामिगोचरेति लक्षणात् तत्सिद्धं शास्त्रं तत्प्रतिपक्षा
प्रकल्पनया स्थिरं सारस्वतं विद्यासंपत्तिस्तु आत्मा नितिष्ठतु साटोपेन साडम्बरेण तर्कच्छटानां तर्कपरंपराणां शास्त्रैः शास्त्रैः प्रहृत्य प्रहृत्य
प्रहृत्य शस्त्राशस्त्रि तद्रूपेण विहारेण वाग्व्यापारेण संभृतः संपादितो रणस्तादृशे युद्धानुभवो येषु तेषु नः यतिप्रसिद्धान्तमार्गवर्तिनिशि
ष्याणामस्माकं वादेषु पुरः अग्रे को वा कश्चिदपि चक्षुरुदञ्चयेत् प्रसारयेत् प्रत्यवस्थानानुवादिकं तिष्ठतु नेत्रमपि किंस्विदयेत् भेय

आत्मां नाम यतीन्द्रपद्धतिजुषामाजन्मशुद्धामतिस्तत्राव्याजविशुद्धमुग्धमधुरं सारस्वतं शास्त्रवत् को
वा चक्षुरुदञ्चयेदपि पुरः साटोपतर्कच्छटाशस्त्राशस्त्रिविहारसंभृतरणस्तादेषु वादेषु नः ॥ ६८ ॥

त निमीलितनेत्र एव भवेदिति भावः अत्र स्वप्रागल्भ्यप्रतिपादनस्य गुरुस्तुतिपर्यवसायित्वात्रात्मप्रशंसादोषः गुरुस्तुत्यं गतया
वर्णनीयेन स्वोत्कर्षेण निरवधिकगुरूत्कर्षप्रतीतेः प्रस्तुताङ्कुरालंकारः प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुर इति लक्षणात् ६८
॥ ॥ पटचूर्णीकृतसकलतन्त्रावयवमिति यतीन्द्रेण मृषा तन्त्रनिम्नपरिश्रमवद्भिर् ज्ञानाधैर्न किंचिदपि विचारणाय इत्या
हू पर्यायेत्यमिति कणचरणस्य कणादस्य कणभावाकसंदर्भपर्याप्तं संपूर्णप्रयासात्तथापर्यंचैवं परिचयप्रकर्षपरिपूर्णवी
ज्ञितिन्य्रचयनेदं तस्माल्लुङ् उत्तमपुरुषैकवचनं आक्षपादं अक्षपादेनोक्तं गौतमशास्त्रं शिशिक्षे अभ्यस्तवानास्मि मीमांसे

प्रति.
सी
२५

25

यामीमांसाशास्त्रेण मांसलः बलवानात्मा मनो यस्य तथाविधः समजनिषि अभवं जनी प्रादुर्भाव इत्यस्माद्धातोरात्मनेपदिलुङ् उत्तमपुरु
षैकवचनं सांख्ययोगौ कपिलहिरण्यगर्भकृते शास्त्रे मुक्तः सम्यक्कृतः समाख्यां आख्यातवानास्मि चक्षिङ् व्यक्तायां वाचि इत्यस्माल्लुङ् उत्त
मपुरुषैकवचनं चक्षिङः ख्याञ् इति ख्यादेशः अस्यतिवक्तिख्यातिभ्योऽङ् इत्यङ् धातोरङादेशः आतो लोप इटि च इत्याकारलोपः असि
द्धे इत्यमङ्कारस्य पूर्वरूपमेकादेशः इत्थं अनेन प्रकारेण यत्नीड्येण त्रुटितानि खण्डितानि बहूनि मतानि तन्त्राणि अनन्तशास्त्राण्ये
व काननानि गहनानि दुष्प्रवेशानि गहनानि तत्र पान्थैर्नित्यपथिकैर्यावज्जीवपरिश्रमवद्भिः अन्तर्मोहोः ज्ञानमेव क्षपान्तयाश्रधैस्तन म

पथां त्रिपर्यचैःप्रवणचरणकथामाक्षपादं शिशिक्षे मीमांसामांसलात्मा समजनिषि मुक्तः सांख्ययोगौ
समाख्याम् इत्यनैस्तैर्यन्नीडत्रुटितवतमःखानि तत्रकान्तारपान्थैरन्तर्मोहस्वपान्थैरहह किमिह न श्रितं नीयतेनो

जानन्भिस्तैस्तैर्वादिभिः नः यत्नीड्यसमर्पितशास्त्रपरिश्रमवतां पदार्थतत्वं सम्यक्परिशोधयतामस्माकं तनीयः अल्पमपि चिंत
नीयं विचारणीयं इह अस्मिन् जगति किंनु किंचिदपीत्यर्थः उक्तेष्वेषु यावज्जीवपरिश्रमसत्वेपि अज्ञानानि च्छिन्नेति तत्वविचारानुपयो
गित्वान्नाहृष्टैः सह किमपि चिंतनीयं नास्तीति भावः यत्नीड्यत्रुटितेति पदार्थस्य विचारानर्हतां हेतुतात्पार्थहेतुकं काव्यलिंग
मलंकारः शिशिक्षे इति परोक्षविषयस्यापि लिटस्तद्विवक्षया प्रयुक्तानवद्यन्तत्वमात्रे लक्षणं वा नेमपुरुषेनिवाहोऽश्र्व्य ९९ ॥ राम २५

राम ॥ श्रीराम ॥ राम ॥ ॥

गाथेति यतिपतेस्त्रिवेदीवेदत्रयमेवमङ्गवेदीमंगलसिंहासनवेदिकां भजतिसन्निति योगतो वृद्धौ भक्तिर्भजनी यदेवतां एवामिति
नयोगनावोद्धः भक्तिरित्यएतेनेषां गाथा कल्पनाकृथा जगतिगलतिनिवर्तते कापिलीकपिलशोक्तागमनिका प्रक्रियायोगमन्नेतेः
नयोगमनीमूर्त्यागमनीगमका अल्पेइतिकः व्यापिकृत्यापिलीनाप्रक्रियाकारणदवाली वैशेषिकोक्तिः क्षीणकृष्णाद्रुहिणहरगि
रः हिरण्यगर्भशंकरोक्तयः योगयस्तुपतेग्रन्थाः सौरभेनारभंतेप्रकाशनभजंतेरशक्तिटोरितिपूर्पयुदासानंनुमकौमारिलोक्तिः कुमा

गाथानायोगनानांगलतिगमनिका कापिलीकापिलीनाक्षीणकाणादवालीद्रुहिणहरगिरः सौरभेनार
भंते क्षामाकौमारिलोक्तिर्जगतिगुरुमतंगौरवाद्दूरवांत का शंका शंकरादेर्भजतियतिपतौ भद्रवेदी त्रिवेदी १०
विषग्व्यापिन्यगाधे यतिनृपतियशःसंपदेकाललेवेस्मिन्स्फूर्जत्सुद्धावगाहेस्तुभमतिभिरसौवेंकटेशोभिषि
क्तः प्रज्ञासैर्जनगजेन्द्रानिरुपकवचनत्तूलवातूलवातूत्तासमवनत्याशारदेवतासमनतनुतसतांप्रीतिमेतां समेता ११

रित्यसंबंधिनीवाकमहंतनेत्रमित्यर्थः क्षामा कृशा गुरुमतं प्रभाकरमतं गौरवाद्दूरमानात् दूरवांतं दूरत्यक्तं गजायत्रतंगात्येनेम शाका
नांतु का कयेत्यभिप्रायः एतद्दृष्ट्वा शंकते शंकरादेः का शंका विचारः यद्वा शंकरादेरिति पंचमी ततः सकाशात्काशंका किं भयमित्य
र्थः ततः सर्वोत्तीर्णं वैदिकमहासिद्धान्त इति भावः १० कविरिदानीं स्तुतिमुपसंहरन्नयोक्तिमाश्रित्य यतिनृपतिकीर्तिसं
तोषवद्धिर्वेदांतगुरुपदाभिषिक्तो वेंकटाचार्यस्तेषां यतिराजसन्नतिजनितप्रीतिमेवपारितोषिकं ददाति स्माह विषगिति विष
ग्व्यापिनि समंताद्व्याप्तिमति अगाधे अतलस्पर्शिनि अपरिच्छिन्ने इत्यर्थः यतिनृपतेर्यशःसंपद्येवेकाललेवे... हितीयसमुद्रे अवगाह्य
सिद्धावगाहेः सपत्नावगाहेस्तुभमतिभिर्भागवतैरभिषिक्तः वेदांताचार्यपदे कृताभिषेको वेंकटेशः सतां सत्पुरुषाणां प्रज्ञयानेका

यति
ती
२६

26

स्यगोचरयातुष्ठाय दौर्जन्यं धार्ष्ट्यं न गर्जनां गर्जनं कुर्वतां प्रतिकथकानां प्रतिवादिनां वचांसि तूलानीव तेषां वातूलस्य वात्यायाः
कृन्तिरिव नन्निर्यस्मात्तया सारवत्तासमन्त्यासमेतां प्राप्तां एतां प्रत्यक्षतोनुभूयमानां श्रीनिसमनन्तुतवित्तनुवानू ११ ॥ ॥आशे
ति कथावाद एवाहवो युद्धं तस्मिन् कुतूहलिभिः सतो पटुभिः कर्तृभिः परेषां परवादिनामेव शत्रूणां कर्णे सः परवादिभयंक
रत्वेन प्रसिद्धः एषः यतिराजसप्ततिरूपः कवितार्किकसिंहस्य वेदान्ताचार्यस्य नादः एव सिंहनादः कार्यः कर्तव्यः स किंविधः
अविषह्यवेगान् तीक्ष्णप्रसरणान् आशामतंगजान् दिग्गजत्वेन प्रसिद्धपरवादिसमूहान् यतिक्षितिभृतो यतिराजस्य प
पर्वतस्येति गम्यते पादे चरणे प्रत्यंतपर्वते च प्रसभं बलात्कारेण निरुंधन् पालयन् लक्षणेन शास्त्रप्रत्ययः नाहृशवस्यावि

आशामतंगजगणानविषह्यवेगान्पादे यतिक्षितिभृतः प्रसभं निरुंधन् । का
हव र्यः कथाकुतूहलिभिः परेषां कर्णे स एष कवितार्किकसिंहनादः १२ ॥

श्लिष्ट इत्यर्थः सिंहनादोपि पर्वते गजान्स्तनितवधान्ति नहृदितिध्वनिः परेषामिति सिंहनाद इति च विशिष्टरूपकं कथाहवकु
तूहलिभिरित्यश्लिष्टरूपकमिति तयोरंगांगीभावसंकरः आशामतंगजगणानित्यत्र रूपकानि शब्दोक्तिक्षितिभृतः पादे इति श्लेष
मूलकाभेदातिशयोक्तिरिति तयोः संकरः स च सिंहनाद इति श्लिष्टरूपकापेक्षा इति संकरः केचित्तु आशा आशा अभिलाषा एव मतं
गजगणानिति व्याचक्षते तदा श्लिष्टरूपकालंकारः १२ ॥ श्रीरामचंद्राय नमः ॥ ॥ राम
॥ ॥ ॥ ॥ ॥ २६